आरण्यकम्　　मार्च 2009　　ISSN 0975 - 0061
अर्धवार्षिकं संस्कृतशोधपत्रम्　　आर.एन.आई. सं.58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   - स्व. पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक'स्य भोजपुरी-पद्यानुवादः)
   -श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   - श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) - स्व. भवानीदत्त शर्मा
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधारणा - श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् - पं. व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह - श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् - स्व. पं. उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. हनुमच्चरितम् - स्व. पं. वज्रभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
13. उपनिषदों की भूमिका - पं. जगदीश्वर प्रसाद मिश्र 'नलिन'
    51 रूप्यकाणि
14. महाभारतसारसंग्रहः (प्रकाश्यः) - स्व. पण्डित वचन मिश्रः
15. चरितरत्नत्रयी - स्व. पं. व्रजभूषणमिश्र 'आक्रान्तः'
    51 रूप्यकाणि
16. जगन्नाथचरितम् - डॉ. बनमाली बिश्वालः
    60 रूप्यकाणि
17. कृत्-प्रत्ययविश्लेषण - डॉ. गोपबन्धु मिश्रः
    204 रूप्यकाणि

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संस्कृतप्रसारपरिषद्
आरा (विहारः)

षोडश वर्षम्, प्रथमोऽङ्कः
मार्च 2009

## ‘आरण्यक’स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते। वर्षारम्भः चैत्रात् (मार्च तः) मन्यते।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते। मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते। तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्क उपलब्धौ सत्यां प्रेषयिष्यते।
3. वार्षिकं शुल्कं पञ्चाशत् (50) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चविंशतिः रूप्यकाणि वर्त्तते। शुल्कं धनादेश/ड्राफ्टमुखेन/कोरबैंकिंद्वारा प्रेषणीयम्।
   (क) धनादेश (M.O) द्वारा शुल्कप्रेषणं **श्री नीलमणि पाठकः, रामेश्वर-लीलासदनम्, महावीरस्थान, मौलाबाग, आरा( विहार )-802301** दूरभाषः-09431451895 नाम्ना करणीयम्।
   (ख) बैंक ड्राफ्ट **‘संस्कृतप्रसारपरिषद्’** इति नाम्ना ‘आरा’ ( विहारः ) नगरे व्यवहरणीयं कृत्वा **श्रीनीलमणि पाठकस्य** उपरिलिखिते (3.क इत्यत्र) सङ्केते प्रेषणीयम्।
   (ग) कोरबैंकिं (Core-Banking) द्वारा ‘संस्कृतप्रसारपरिषद्’-नाम्ना Indian Bank, Ara खाता सं.552203784 इत्यत्र राशिः प्रेषणीयः।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिका निबन्धाः प्रकाशनाय गृह्यन्ते। अस्वीकृता लेखा निर्धारित-‘स्टाम्प’-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किता वा स्युः। रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम्।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम्।
8. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते।
9. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः।
10. ‘आरण्यक’सम्बद्धः लेखप्रकाशनसमीक्षादिविषयकः सर्वविधपत्रव्यवहारः **डॉ. गोपबन्धु मिश्रः, प्रोफेसर, संस्कृतविभागः, काशी हिन्दू विश्व-विद्यालयः, वाराणसी-221005 इति सङ्केतेन** दूरभाषः-0542-2310561, (चलः) 09450870788 विधेयः।

# आरण्यकम्

**संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्**


**वर्षाङ्कौ - षोडश वर्षम्, प्रथमोऽङ्कः**

**चैत्रः, वि.सं. २०६६**

**मार्च, २००९**


**प्रतिवर्षं प्रकाशनकालः**
**चैत्रः, आश्विनः-विक्रमाब्दः**
**मार्च, सितम्बर**

प्रत्यङ्कम् - २५ रूप्यकाणि    वार्षिकं शुल्कं ५० रूप्यकाणि

## परामर्शदात्री समितिः

डॉ. सुरेशचन्द्र गो. काण्टावाला, बड़ोदरा
डॉ. हरिहर झा, दरभङ्गा
डॉ. उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ. भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ. राय अश्विनी कुमारः, बोधगया

संस्थापकः
**स्व. पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

सम्पादकः
**प्रो.गोपबन्धु मिश्रः**
संस्कृतविभागः
काशी हिन्दू विश्वविद्यालयः, वाराणसी

सह-सम्पादकः
**डॉ. सुनीलकुमार प्रधानः**

प्रकाशिका
**संस्कृतप्रसारपरिषद्**
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301

संस्कृतप्रसारपरिषद्, आरा पक्षतः प्रो. गोपबन्धु मिश्रेण, महावीर प्रेस, बी.20/44, भेलूपुर, वाराणसी इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च।


## सम्पादकीयम्

सूदूरम् अतीतम्। स्मृतेरपि प्राक्, केवलं श्रुतिः। श्रुतिपरम्परा, सैषा भारतीया। मध्येकालं सहस्राणि वर्षाणि। अगणिता जीवनधारा प्रवाहिता। असंख्यानि परिवर्तनानि संजातानि। पुराणेषु राजवंशद्वारा कालगणनारीतिः आसीत्। एवमेव कालावधावस्मिन् अनेके राजवंशा आगताः, अपरिमितानि राजवंशानुचरितानि घटितानि। तेषु कानिचन उल्लिखितानि, शिलालेखादिषु उट्टङ्कितानि, कानिचन ऊह्यानि च। सेयं सुदीर्घा पृथिव्यामस्यां दीर्घतमा च भारतीया संस्कृतिः पुरातनी, प्राचीना वा जगतीतले सुविख्याता।

भारतीया संस्कृतिरियं सर्वप्राचीना, सर्वासु उपलब्धासु संस्कृतिषु पुरातनतमा इत्यतः एषा वयसा सर्वतो ज्येष्ठा विद्यते। किन्तु आयुषा एषा सर्वविधसंस्कृतिभ्यः ज्येष्ठत्वेन वृद्धत्वमाप्त्वा पूज्यत्वमाप्नोत् इति न, अपि तु एतस्या वृद्धत्वम् आदिमावस्थायामेव आसीत्। वस्तुतः वृद्धत्वं द्विविधं मन्यते– १. वयोवृद्धत्वम्, २. धर्मवृद्धत्वं च। भारतवर्षे आदिकालाद् वयोवृद्धत्वापेक्षया धर्मवृद्धत्वम् समधिकमादृतं चर्चितं शंसितं च। यूनो राज्ञो दिलीपस्य धर्मेण वृद्धत्वं प्रशंस्य महाकविः कालिदासो ब्रूते–

**तस्य धर्मरतेरासीद् वृद्धत्वं जरसा विना।** (रघु.१.२३)

शङ्करमवाप्तुकामां कठोरं तप आचरन्तीं पार्वतीं दिदृक्षवो वयोज्येष्ठा वृद्धास्तपस्विनः समागच्छन्ति स्म। तत्र च महाकविः वृद्धत्वविषये भारतीयां दृष्टिं स्पष्टतरामभिधत्ते–

**न धर्मवृद्धेषु वयः समीक्ष्यते।** (कुमार. ५.१६)

बालको ध्रुवो भगवन्तम् अवाप्तवान्, तथैव बालकः प्रह्लादो दृढभक्त्या नरहरिरूपधारिण आविर्भावाय निमित्तभूतोऽभवत्। बाल्यावस्थायामेव महामुनिः शुको ब्रह्मवित्त्वं समध्यगच्छद् इत्येतादृशानि असंख्यातान्युदाहरणानि भारते ज्ञानमुखेनाप्तस्य धर्मवृद्धत्वस्य वैशिष्ट्यम् उररीकुर्वन्ति। अतो भारतीया संस्कृतिः अतिप्राचीना अतिवृद्धा वेत्यतः पूज्या वरेण्या वेति न, अपि तु अस्या भारतत्वं

**प्रो. गोपबन्धु मिश्रः**
सम्पादकः

सर्वं किमपि अवस्थादेशकालादिगतं लघु लघु वैशिष्ट्यमतिशय्य विराजते। भायां रतं = भारतं, तस्य भावः भारतत्वं नाम भायां तेजसि सर्वतो दीप्तिमति धर्मप्रणोदिते गुणविशेषे क्रियाविशेषे वा रतं रमणशीलम् अत्र चैतन्यमिति विशेषः। कठोपनिषदि बालस्य नचिकेतसो नित्यानित्यवस्तुविवेको मृत्युमपि आश्चर्चान्वितीकरोति। सावित्र्याः सुदृढं पातिव्रत्यं नैष्ठिकं धैर्यं च पतिं सत्यवन्तं मृत्युलोकात् पुनर्मर्त्यलोकं प्रत्यावर्तयति। रणाङ्गने एकाक्यपि बालोऽभिमन्युः सप्तभिः वयोज्येष्ठैः महारथिभिः सह स्पर्धितुं प्रभवति। आदिशङ्कराचार्येण बाल्यावस्थायामेव विदितवेदितव्यता समर्जिता। युवाऽवस्थायामेव सिकागोधर्मसम्मेलने भारतीयधर्मध्वजां समुत्तोलयता स्वामिविवेकानन्देन वैश्विके इतिहासेऽनुपमा कीर्तिः संस्थापिता। एवंप्रकारेण भारतवर्षे सर्वथा भायाः प्रतिभायाः वा कारणेन श्रेष्ठताम् आपद्यमानानां महत्ता प्राशस्त्यं प्राशंस्यं चाधिजगाम, न तु केवलं वयोज्येष्ठता। भारतीयायाः शेमुष्या विशिष्टतां पोषयन्तं चित्रविशेषं प्रस्तुवन् श्लोक एषोऽनुरूपं किमपि वक्ति, तद्यथा–

**चित्रं वटतरोर्मूले वृद्धाः शिष्या गुरुर्युवा।**
**गुरोस्तु मौनं व्याख्यानं शिष्यास्तु छिन्नसंशयाः।।** इति।

अत्र शिष्याणां वृद्धत्वं नाम वयसा ज्येष्ठत्वम् अभिप्रेतम्, किन्तु तदपेक्षया ज्ञानेन धर्मेण च श्रेष्ठताम् आप्नुवतः यूनोऽपि गुरुत्वं सर्वथा स्तुत्यमिति आशयो भारतीयसंस्कृतौ ज्येष्ठताऽपेक्षया श्रेष्ठताया महत्तरत्वं सुतरां साधयति।

एतदासीत् प्रवृत्तघटनाश्रेण्याश्रितस्य अस्माकं स्वभावस्याख्यानम्। प्रवृत्त-प्रवर्तिष्यमाणयोरन्तराले प्रवर्तमानं जीवति। प्रवर्तमानानाम् अस्माकं मनसि प्रवर्तिष्यमाण-विषये विविधाः शङ्काः समुद्यन्ति। समग्रधरायां ज्येष्ठत्वस्य प्राबल्यं दृश्यते। धनेन बलेन चातुर्येण स्वस्य इतरापेक्षया ज्यायस्त्वं साधयितुं सर्वाणि राष्ट्राणि परस्परं स्पर्धन्ते। भोगेन ऐश्वर्येण चातुर्यकर्तृकपरद्रव्यापहरणादिना व्यसनेन ज्येष्ठत्वं साध्यमानं लक्ष्यते। तज्ज्येष्ठत्वजन्यः अहङ्कारोऽपि तेन परिमाणेन विवर्धमानो भवत्येव। किन्तु श्रेष्ठत्वे सिद्धे सर्वं किंचन कल्याणमयं भवति। यतो हि श्रेष्ठत्वं भोगेन व्यसनेन वा नैवाऽऽप्यते, अपि तु त्यागेन तपसा सर्वजनहितचिन्तनेनैव तत् सुलभं भवति। उपर्युक्तेषु उदाहरणेषु यत् श्रेष्ठत्वम् अस्माभिः परिलक्षितं तत् सर्वं तत्तद्बालानां युवजनानां वा नित्यानित्यवस्तुविवेककारणेन, प्राणिमात्रकल्याणकामनया सात्त्विक्या वा बुद्ध्या सिद्धं विद्यते। सात्त्विकबुद्धिलक्षणं यथोक्तं गीतायाम्–



**प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाऽभये।**
**बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी।।** (गीता १८.३०)

यदि वयं सात्त्विकबुद्ध्या कार्याकार्ये विविच्य अकार्यं विहाय कार्यं, बन्धनिमित्तं विहाय मोक्षसाधने प्रवर्तामहे तर्हि तेन नूनमेव अस्माभिः सह सर्वेषां कल्याणं सम्पत्स्यते, तेनैवोपायेन अस्माकं श्रेष्ठत्वं पूर्ववत् सिद्ध्येत्। न केवलं धनावाप्तिप्रसङ्गे विषयोपभोगविषये वा ज्येष्ठत्वश्रेष्ठतयोरयं भेदो विवेच्यः, अपि तु ज्ञानाहरणप्रसङ्गे तदुपयोगसन्दर्भे च एतद् ध्यातव्यं विद्यते। इदानीन्तनः कालखण्डः ज्ञानकालखण्डः इत्युच्यते। सर्वविधविषयेषु ज्ञानस्य आदानं प्रदानं व्यापारश्च सर्वत्र चलन्ति। सम्पूर्णे विश्वस्मिन् सम्बद्धविषयविशेषज्ञानां विशिष्ट आदरः, तेषां च सम्पूर्णे विश्वस्मिन् अन्तर्जाल (internet) द्वारा सम्पर्कः, तेषामुपयोगदृष्ट्या मूल्यनिर्धारणम्, तत्र च न्यूनाधिक्याधारेण तेषां कुत्रचित् अनुबन्धः इत्यादिकं पूर्वापेक्षया समधिकया शक्त्या प्रवर्तमानं विद्यते। अत्र यदि कस्यचिद् विशिष्टज्ञानविशेषज्ञस्य प्रवृत्तिनिवृत्तिभेदबुद्धिः नश्यति, कार्याकार्यविचारणा लुप्यते तर्हि तस्य समाजे धनसम्पत्त्यादिकारणेन ज्येष्ठत्वं तु आपद्येत किन्तु श्रेष्ठता सिद्धा न भवेत्। विद्याया अर्थकारित्वं यदि सीमाबद्धं न स्यात् तर्हि **सा विद्या या विमुक्तये** इति भागवतोक्तिः विफला भवति यतो हि सा विद्या बन्धनाय प्रवर्तयेत्। यदि तस्या विद्याया ज्ञानस्य वा उपयोगः सकलजनहिताय भवति तर्हि सा तदुपयोक्तुः न केवलं विमुक्तये परमसन्तोषाय वा भवति, अपितु तस्य श्रेष्ठत्वमपि सम्पादयति, विशिष्टतया यूनां मध्ये आभियान्त्रिक-चिकित्सा-प्रबन्धनादिविषयमाश्रित्य ज्ञानार्जनाय तथा च अर्जितज्ञानद्वारा प्रभूतधनार्जनस्य या स्पर्धा दृश्यमाना विद्यते तत्र अन्ततोगत्वा तेषां निष्फलं ज्येष्ठत्वं साधीयो भवतु नाम, किन्तु श्रेष्ठत्वं नैवाप्तुं शक्ष्यते। अतोऽत्र कथितरीत्या सात्त्विकबुद्ध्या एव ज्ञानार्जनं ज्ञानोपयोगश्च अतीव प्रासङ्गिकतया ध्यातव्ये स्तः।

शोधपत्रमिदम् **आरण्यकं** प्रत्येकं ज्ञानप्रसङ्गे सर्वेषां श्रेष्ठत्वं यथा सुतरां साध्यं स्यात् तदर्थं सूत्रधाररूपेण प्रवर्तमानं विद्यते। वृत्तवर्तिष्यमाणयोर्मध्ये वार्तमानिकीम् इतिकर्तव्यतां निश्चेतुं शास्त्रप्रथितविषयाणाम् आलोडने नैरन्तर्यम् अपेक्षितं विद्यते। गीतायामुक्तमस्ति–

**तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ।** (गीता १६.२४)

कार्याकार्यविवेकभूमौ प्रामाणिकतया शास्त्राणामेव विद्यमानतया तेषु अवगाहमानानां चिन्तनपुटकानि शब्दार्थशरीरमाश्रित्य यत् निःसरेयुः तानि सम्यक्तया आधातुं सकलसहृदयानां पुरतश्च तानि समुपस्थापयितुं शोधपत्रमिदं प्रयतमानमस्ति। प्रयत्नेऽस्मिन् कालगतो विलम्बो यत् सञ्जायते तदग्रे न स्यादिति यतमाना वयं विदुषां पुरतः आरण्यकस्य नवीनं कलेवरमिदं प्रस्तोतुं प्रभवाम इति।

विदुषां विशंवदः

मार्च 2009

गोपबन्धु मिश्र

सम्पादकः



## सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| 1. पाणिनिदृष्ट्या कारकम् | प्रो. हृषीकेश ओझा<br>अतिथिभवनम्<br>मुमुक्षुभवनम्, अस्सी, वाराणसी | 1 |
| 2. षष्ठीविमर्शः | डॉ. सि. एस्. एस्. नरसिंहमूर्तिः<br>वरिष्ठव्याख्याता, राष्ट्रियसंस्कृतसंस्थानम्<br>राजीवगान्धीपरिसरः, शृङ्गेरी | 7 |
| 3. तद्धितानां भेदस्वरूपे | बन्दिता शतपथी<br>शोधच्छात्रा (संस्कृतम्)<br>संस्कृतप्रगताध्ययनकेन्द्रम्<br>पुणे विश्वविद्यालयः, पुणे | 15 |
| 4. विशिष्टाद्वैतवेदान्ते ब्रह्मविचारः | डॉ. दीपक कुमारः<br>उपाचार्यः, संस्कृतविभागाध्यक्षश्च<br>महाराजा महाविद्यालयः, आरा | 25 |
| 5. चम्पूभारतस्य परिशीलनम् | डॉ. पूर्णचन्द्र उपाध्यायः<br>संस्कृतविभागाध्यक्षः<br>राजकीय बिडला महाविद्यालयः<br>भवानीमण्डी (राजस्थानम्) | 31 |
| 6. रसदृष्ट्या कार्तवीर्योदय-महाकाव्यस्य समीक्षा | तेजनाथ पौडेलः<br>शोधच्छात्रः, संस्कृतविभागः<br>काशी हिन्दू विश्वविद्यालयः, वाराणसी | 35 |
| 7. कौटिलीयस्यार्थशास्त्रस्य महत्त्वम् | डॉ. महेश केवटः<br>सहायकशिक्षकः<br>राजकीय हसनपुर उच्चविद्यालयः<br>लखीसराय (बिहार) | 41 |
| 8. रामकथाश्रितकाव्येषु 'भरतचरितम्' | डॉ. सुनील कुमार प्रधानः | 45 |

| | | |
|---|---|---|
| 9. भारतीयनाट्यपरम्परायां प्रतीकनाटकानां विकासः | डॉ. मिथिलेश कुमार पाण्डेयः<br>पूर्ववरीयशोधच्छात्रः, संस्कृतविभागः<br>पटना विश्वविद्यालयः, पटना | 49 |
| 10. कठोपनिषदि लौकिकाः प्रसङ्गाः | डॉ. रविमोहनः<br>ई.106, आशु इन्क्लेव<br>आरा गार्डेन<br>जगदेवपथ, पटना-14 | 53 |
| 11. स्वराश्रया यात्रा | रञ्जना कुमारी<br>शोधच्छात्रा, संस्कृतविभागः<br>पटना विश्वविद्यालयः<br>पटना | 57 |
| 12. शाकुन्तले स्त्रीधर्मविवेकः | डॉ. प्रतिमा परमार<br>पटना सिटी, पटना | 61 |




# पाणिनिदृष्ट्या कारकम्

**प्रो. हृषीकेशओझा**

संस्कृतभाषायां व्याकरणे वा कारकशब्दस्य प्रयोगः पाणिनितः पूर्वमपि आसीत्। अतएव कारकसंज्ञा पूर्वाचार्यसंज्ञा कथ्यते। पाणिनिः कारकस्य कामपि परिभाषां न ददाति। सः अष्टाध्यायीग्रन्थे 'कारके' (1.4.23) इति सूत्रेण कारकस्य प्रवेशं करोति। कारके इति सामान्यरूपेण अधिकारसूत्रम्। अस्य सूत्रस्य अधिकारः 'तत्प्रयोजको हेतुश्च' (1.4.55) इति सूत्रपर्यन्तं वर्तते। अपादानादिसंज्ञाविशेषप्रवर्तकानां सूत्राणां विषये अस्य सूत्रस्य अधिकारः प्रवर्तते। कारकशब्दस्य व्युत्पत्तिः–कृधातोः ण्वुल्–प्रत्ययः, विग्रहश्च–करोति इति अथवा क्रियां निर्वर्तयति इति। अतः कारकाणां क्रियया सह सहजः सम्बन्धः वर्तते। यथा काशिकायां–कारकशब्दस्य निमित्तपर्यायः कारकं हेतुरित्यर्थान्तरम्। कस्य हेतुः ? क्रियायाः।

महाभाष्ये अस्य व्याख्या–कारक इति संज्ञानिर्देशः. . . .साधकं निवर्तकं, कारकसंज्ञं भवतीति वक्तव्यम्। अस्य शब्दस्य अर्थं ज्ञातुं महाभाष्यकारः कारकमिति अन्वर्थसंज्ञारूपेण गृह्णाति। तस्य कृते कारकस्य अर्थः वर्तते करोतीति कारकम्। कारक इति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत् लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम् अन्वर्थसंज्ञा यथा विज्ञायेत-करोतीति कारकम्। अतएव यत् क्रियया सह सम्बद्धं वर्तते अथवा क्रियाणां निमित्तं वर्तते तत् कारकरूपेण कथ्यते। यथा–मैत्रेयस्य तण्डुलं पचति–इत्यत्र मैत्रेयः यद्यपि तण्डुलेन सम्बद्धः पचतिक्रियायाः सामान्यहेतुः भवितुं सम्भाव्यते यतः मैत्रेयः तण्डुलप्रापणे हेतुः भवितुं शक्नोति। अतएव अन्वर्थानुसारेण–करोतीति कारकम्–इत्यस्य अर्थः भवति यत् यः साक्षाद्रूपेण, न तु अन्येषां माध्यमेन, क्रियामाप्तुं कारणं भवति तदेव कारकरूपेण स्वीक्रियते। यथा वादार्थसंग्रहे–विभक्त्यर्थ-द्वारा क्रियान्वयित्वं मुख्याभाक्तसाधारणं कारकत्वं क्रियानिमित्तत्वसहितं मुख्यमिति। विभक्त्यर्थद्वारा इत्यनेन स्तोकं पचति इत्यादिषु उदाहरणेषु क्रियाविशेषणानां कारकत्वम् निवारयति। मैत्रेयस्य तण्डुलम्पचतीत्यादिषु उदाहरणेषु मैत्रेयस्य क्रियान्वयित्वाभावात्

तत्र कारकत्वं निवारयति। यथा प्रौढ़मनोरमायां–अन्वर्था चेयं संज्ञा–करोतीति कारकम् इति–तेन क्रियानन्वयिनः न भवन्ति। ब्राह्मणस्य पुत्रम्पन्थानं पृच्छति। इह हि ब्राह्मणशब्दः पुत्रविशेषणं न क्रियान्वयी (1.4.49)।

वस्तुतः क्रियया सह एकस्मात् अधिकाः पदार्थाः सम्बन्धं स्थापयन्ति तथा क्रियापूर्णतायां सहाय्याः भवन्ति। सामान्यतः एवम्प्रकारकस्य प्रत्येकपदार्थस्य क्रियया सह सम्बन्धः कर्तृरूपेण न स्वीक्रियते। किन्तु एतदपि सत्यं यत् एकः शब्दः पदार्थ-बोधकः एव क्रियायाः कर्ता भवितुं शक्नोति। अर्थात् एकस्मिन् काले एव यद्यपि बहवः पदार्थाः क्रियायाः सम्पर्के आगच्छन्ति किन्तु कर्तृरूपेण तेषां सम्बन्धः न भवति। अतएव कारकाणां भेदाः भवन्ति। कर्तारं विहाय ये अन्ये पदार्थाः क्रियामाप्तुं सहायकाः भवन्ति तेषां क्रियया सह अन्यः कोऽपि सम्बन्धः स्वीकार्यः स्यात्। अर्थात् पदार्थबोधकाः एते शब्दाः वाक्ये प्रयुक्ताः सन्तः क्रियामाप्तुं सहायकाः भवन्ति किन्तु ते अन्यरूपेण कर्तुः साहाय्यं कुर्वन्ति अथवा क्रियया सह कर्तृत्वं विहाय अन्यं सम्बन्धं स्थापयन्ति। अतएव करोतीति अन्वर्थः कर्तृकारकार्थस्य अन्य-कारकार्थस्य च कृते प्रयुक्तः भवति। अतः कैयटः प्रदीपटीकायां (3.2.115) सर्वासां कारणादिशक्तीनां क्रियासिद्धौ निमित्तत्वाऽविशेषात् साधनत्वप्रतिपादनार्थम्। सः स्पष्टं करोति यत् प्रत्येकेषां पदार्थबोधकानां शब्दानां क्रियया सह सम्बन्धः अन्वेषणीयः। नागेशः **क्रियानिष्पादकत्वं कारकम्** इति वचनेन, जीवगोस्वामी हरिनामामृत-व्याकरणे **क्रियासम्बन्धविशेषि कारकम्** इति वचनेन, वात्स्यायनो न्यायभाष्ये **एवं च सति न द्रव्यमात्रं कारकं न क्रियामात्रम्, किं तर्हि? क्रियासाधनम्** इति वचनेन तदेव समर्थयति।

सामान्यतः क्रियायाः परिभाषा एवं क्रियते–धात्वर्थः क्रिया। अर्थात् कार्यविधिविषये व्यापारस्य अपूर्णावस्था। ऋग्वेदप्रातिशाख्ये (XII.5) **तदाख्यातं येन भावं स धातुः**। यास्कः क्रिया भाव इति स्वीकरोति अतएव कथयति **भाववचनो धातुः। पूर्वापरीभूतं भावमाख्यातेन आचष्टे व्रजति पचति इत्युपक्रमप्रभृत्यपवर्गपर्यन्तम्** (निरुक्तम् 1.1)। दुर्गाचार्यः टीकायां स्पष्टं कथयति यत् **क्रियायाः साक्षात् ज्ञानं सम्भवं न किन्तु पदार्थे परिवर्तनं दृष्ट्वा क्रियायाः बोधः भवति–अमूर्ता हि क्रिया निरुपाख्या**। दुर्गाचार्यः एतदपि स्पष्टं करोति यत् क्रियायाः अस्तित्वज्ञानं कारकनिरूपणेनैव भवति सा हि कारकैरभिव्यज्यमाना कारकशरीरे वसन्ती शक्यते निर्देष्टुम्। वार्ष्यायणिः एवम्प्रकारकस्य भावः षट्प्रकारः भवति इति कथयति।



निरुक्ते (1.1) **स्पष्टं षड् भावविकाराः भवन्तीति वार्ष्यायणिः–जायते, अस्ति, विपरिणमते, वर्द्धते, अपक्षीयते विनश्यतीति।** कोऽपि पदार्थः यः एतेषां भावानां प्राप्तिविषये सहायकः भवति सः एव कारकरूपेण स्वीक्रियते। निरुक्ते एतेषां भावानां व्याख्या वर्तते–यथा **जायते इति पूर्वभावस्य आदिमाचष्टे, नापरभावमाचष्टे न प्रतिषेधति, अस्तीत्युपपन्नस्य सत्त्वस्यावधारणम्। विपरिणमते इत्यप्रवच्यमानस्य तत्त्वाद्विकारम्। वर्द्धते इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानां वर्द्धते विजयेनेति वा वर्धते शरीरेणेति च। अपक्षीयते इत्येतेनैव व्याख्यातः प्रतिलोमम्। विनश्यतीति अपरभावस्य आदिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति।** (निरुक्तम् 1.2)

क्रियायाः परिपूर्णतायै बह्व्यः गौणक्रियाः अन्तर्निहिताः भवन्ति। एका प्रधाना क्रिया भवति या कर्तव्या भवति किन्तु तस्याः क्रियायाः सम्पादनसमये अन्यासां क्रियाणामपि आवश्यकता भवति, यथा–पाकक्रियां सम्पादयितुं जलानयनम्, अग्निप्रज्वालनं, पात्रे जलरक्षणम् इत्याद्याः क्रियाः अपि भवन्ति। एतासां क्रियाणां निष्पादनाभावे पाकक्रिया न सम्पद्यते। प्रत्येकं गौणक्रियाया अपि परिणामाः भवन्ति। यदा एते सर्वे परिणामाः क्रमेण संगृहीताः भवन्ति तदैव पाकक्रियायाः सम्पादनं भवति। एका गौणी क्रिया पाकक्रियायाः सम्पादनं कर्तुं न शक्नोति। एतासां गौणक्रियाणाम् एकः क्रमः भवति। अतएव ताः व्यापारक्रियाः कथ्यन्ते। यदा पर्यन्तं ताः क्रियाः ईप्सितं परिणामं न ददति तदा पर्यन्तं तेषां नाम प्रधानक्रिया न भवितुं शक्नोति। एवं पाकक्रियया इष्टपरिणामस्य प्राप्तिर्भवति अतः सा प्रधानक्रिया कथ्यते। वाक्यपदीये–फलप्रत्ययेभ्यो वा भागा क्रिया, तदर्थास्त्वन्ये व्यापाराः (3.8.13)। तथा च एवम्प्रकाराणां प्रधानक्रियाणां निष्पत्तौ ये पदार्थाः संलग्नाः भवन्ति तेषां शक्तिः कारकसंज्ञारूपेण स्वीक्रियते। यथाह भर्तृहरिः (3.7.1)

**स्वाश्रये समवेतानां तद्वदेवाश्रयान्तरे।**
**क्रियाणामभिनिष्पत्तौ सामर्थ्यं साधनं विदुः।।**

अर्थात् प्रत्येकस्मिन् कारके केचन व्यापाराः भवन्ति येन क्रिया पूर्णतामादधाति। व्यापाराणां विभिन्नलक्षणवशात् कारकाणां भेदाः भवन्ति इत्येव भर्तृहरिः कथयति (वाक्यपदीयम् 3.7.44) **सामान्यं कारकं तस्य सप्ताद्या भेदयोनयः**। तस्यानुसारेण कारकम् एकमेव वर्तते। कारकाणां ज्ञानाय श्रोतसः सप्त विभेदाः सन्ति येषु षट् कर्मादिरूपेण कथ्यन्ते तथा सप्तमः शेषरूपेण कथ्यते। अर्थात् प्रसङ्गानुसारेण एकः पदार्थः विभिन्नरूपेषु व्यवह्रियते। एतदपि सुनिश्चितं यत् एकस्मिन् वाक्य एक एव

पदार्थः विभिन्नरूपेषु प्रयुक्तः न भवितुं शक्नोति। अर्थात् वाक्ये पदार्थबोधकाः विभिन्नशब्दाः स्वशक्तिभिः क्रियापूरणे सहायकाः भवन्ति। अर्थात् ते सर्वे सम्मिलिताः सन्तः कर्तृत्वं धारयन्ति। वस्तुतः सर्वाणि कारकाणि स्वक्षेत्रे कर्तृवत् व्यवहरन्ति यतः तानि स्वव्यापारेषु स्वतन्त्राणि सन्ति। व्यापारभेदेनैव तानि कर्म, करण इत्यादि-रूपाणि धारयन्ति। यथा वाक्यपदीये (3.7.18)

**निष्पत्तिमात्रे कर्तृत्वं सर्वत्रैवास्ति कारके।**

**व्यापाराभेदापेक्षायां करणादित्वसम्भवः।।**

वास्तविककार्यमस्ति क्रियायाः पूर्णता। एकः पदार्थः षट्प्रकारेण कार्यं पूरयितुं शक्नोति। इमे षट् प्रकाराः एकस्य कर्तृत्वशक्तिभूतस्य एव प्रभेदाः सन्ति। वयम् इमान् भेदान् व्यवहारे विभिन्नोद्देश्येभ्यः स्वीकुर्मः। उद्देश्यं क्रियायाः प्राप्तिः, तत्तु कर्तृत्वशक्तिमाध्यमेन एव प्राप्यते।

पाणिनिः भर्तृहरिः अन्ये वैयाकरणाश्च षट् प्रकाराः शक्तयः सन्ति तथा एतासु शक्तिषु षट्प्रकारकव्यापाराः सन्ति इति स्वीकुर्वन्ति। नागेशः मञ्जूषायां फलेनोद्देश्यत्व-रूपव्यापारश्च कर्मणः, करणञ्च क्रियाजनकाव्यवहितव्यापारः, प्रेरणानुमत्यादिव्यापारः सम्प्रदानस्य, अपायिभावोपगमव्यापारोऽपादानस्य, कर्तृकर्मव्यवहितक्रियाधारणव्यापारोऽ-धिकरणस्य। वाचस्पतिमिश्रः न्यायवार्तिके व्याख्यां करोति यत् कथम् एकक्रियाया एव सन्दर्भे विभिन्नपदार्थाः कर्तृत्वरूपं धारयन्ति? अस्य हि व्यापारं प्राधान्येन धातुः आख्यातप्रत्ययो वा अभिधत्ते। सः स्वतन्त्रः कर्त्ता। तथा हि विक्लिदन्तीत्यत्र तण्डुलाः कर्तारः। पचति इत्यत्र देवदत्तादयः। तत् कथं हेतोः–एकत्र तण्डुलादेः व्यापारः उत्पत्तिः अपरत्र देवदत्तादेः प्राधान्येन च अशेषकारकनिर्वर्त्यत्वं प्रधानक्रियाया इति। कारकाणि विवक्षायामुपरि निर्भराणि बालमनोरमायां 1.4.42 विवक्षातः कारकाणि भवन्ति इति वाच्यादिति भावः। एवं यदि वयं व्यापारं स्वतन्त्ररूपेण विवक्षामः तदा कर्ता। तथैव करणाधिकरणेत्यादिविषयेषु भवति। भर्तृहरिः क्रियापूर्तिरतद्रव्यं साधनं कथयति। नागेशः अपि तस्यैव विस्तारं करोति–सिद्धस्यैव द्रव्यस्य स्वरूपतः क्रियाजनकत्वानुपपत्त्या शक्त्या आविष्टस्यैव तत्त्वं वाच्यम् इति प्राप्ताप्राप्तविवेकेन शक्तिरेव साधनम्। अर्थात् द्रव्यभूतशक्तिप्रभावेणैव पदार्थस्य क्रियया सम्बन्धो निर्णीयते। अतएव पदार्थ एव कदापि पदार्थशक्तिरूपेण उच्यते। कैयटः प्रदीपटीकायां (3.2.15 परोक्षे लिट्) स्पष्टं करोति- शब्दशक्तिमतोः अभेदविवक्षया साधनशब्देन शक्तिमति द्रव्याणि उच्यन्ते। तथैव पदार्थोऽपि साधनरूपेण व्यवह्रियते।



यदा वयं शक्तिपदार्थयोः मध्ये भेदबुद्ध्या पश्यामः तदा शक्तिः अनुमानिता भवति। तस्याः अनुमानं पदार्थस्य सत्तावशात् अथवा असत्तावशात् ज्ञायते। वाक्यपदीये यथा (3.4.5) **सन्नसन् वाऽर्थरूपेषु भेदो बुद्ध्या प्रकल्प्यते।** लोके एव वक्तुं शक्नुमः यद् यदि पदार्थः प्रत्यक्षः, क्रिया अपि प्रत्यक्षा स्यात्, यदि पदार्थः अप्रत्यक्षः क्रिया अपि अप्रत्यक्षा स्यात्। भर्तृहरिः उदाहरणमाध्यमेन अस्य सिद्धिं करोति–

**बुद्ध्या समाहितैकत्वान् पञ्चालान् कुरुभिर्यदा।**

**पुनर्विभजते वक्ता तदाऽपायः प्रतीयते।।**(वाक्यपदीयम् 5.7.4)।

एवं क्रियायां कारकाणि केवलं बुद्ध्या अनुमेयानि एव वर्तन्ते तथा वयम् अनुमानान्तरं विभक्तिप्रयोगं कुर्मः। यथा ग्रामं गच्छन् पथि मृतः अत्र वस्तुतः ग्रामगमनं न भवति तथापि वयं ग्रामम् इत्यत्र कर्मशक्तिकल्पनां कुर्मः। महाभाष्येऽपि तथैव (3.1.26 हेतुमति च) तेऽपि हि तेषामुत्पत्तिप्रवृत्त्या विनाशवृद्धी व्याचक्षाणाः सतो बुद्धिविषयान् प्रकाशयति। . . . .त्रैकाल्यमपि खलु लोके वक्ष्यते गच्छ हन्यते कंसः। गच्छ हनिष्यते कंसः। किं गतेन हतः कंसः इति। इयं शक्तिः विभक्तिमाध्यमेन द्योतते। विभक्तिप्रत्ययाः अत एव केवलं शब्दशक्तिद्योतकाः भवन्ति। वाक्यपदीये (3.7.13) विभक्त्यादिभिः एव असौ उपकारः प्रतीयते।

पतञ्जलिः क्रियामपि कारकरूपेण साधनरूपेण वा स्वीकरोति। एकः बुद्धिमान् बुद्ध्या तावत्कंचिदर्थं संपश्यति, संदृष्टे प्रार्थना, प्रार्थनायामध्यवसायः, अध्यवसाये आरम्भः, आरम्भे निर्वृत्तिः, निर्वृत्तौ फलप्राप्तिः। एवं क्रिया अपि कारकं साधनं वा भवति। एवम्पूर्वक्रिया अपरक्रियायाः साधनं भवति, अपरक्रिया चेति पूर्वक्रियायाः साधनम्। वाक्यपदीयेऽपि तथैव उक्तं–

**पूर्वस्मिन् या क्रिया सैव परस्मिन् साधनं मता।**

**सन्दर्शने तु चैतन्यं विशिष्टं साधनं विदुः।।**

इयमेव पाणिनिदृष्ट्या कारकस्य सरलविवेचना।

❖

# किञ्चित् पारिभाषिकम्

**काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।**
**अ० = अष्टाध्यायी। वा० = वार्तिकम्**

| | |
|---|---|
| अमित्रः | अमित्रः शत्रुः<br>का. द्विषोऽमित्रे 3.2.130 |
| प्रशंसा | प्रशंसा स्तुतिः<br>का. अर्हः प्रशंसायाम् 3.2.133 |
| किंवृत्तम् | किमः वृत्तं किंवृत्तम्<br>का. किंवृत्ते भिक्षायाम् 3.3.6 |
| लिप्स्यमानसिद्धिः | लिप्स्यमानात् सिद्धिः लिप्स्यमानसिद्धिः<br>का. लिप्स्यमानसिद्धौ च 3.3.7 |
| लोडर्थः | लोडर्थः प्रैषादि<br>का. लोडर्थलक्षणे च 3.3.8 |
| ऊर्ध्वमौहूर्तिकः | ऊर्ध्वं मुहूर्तात् भवः ऊर्ध्वमौहूर्तिकः (निपातनात् समासः, उत्तरपदवृद्धिश्च)<br>का. लिङ् चोर्ध्वमौहूर्तिके 3.3.9 |
| शेषः | शेषः क्रियार्थोपपदाद् अन्यः<br>का. लृट् शेषे च 3.3.13 |
| अनद्यतनम् | (अनद्यतन इति बहुव्रीहिनिर्देशः। तेन व्यामिश्रे न भवति–अद्य श्वा वा भविष्यति)<br>का. अनद्यतने लुट् 3.3.15 |
| स्थिरः | स्थिरः इति कालान्तरस्थायी पदार्थः उच्यते।<br>का. सृ स्थिरे 3.3.17 |
| भवति | क्रियासामान्यवाची भवतिः। तेनार्थनिर्देशः क्रियमाणः सर्वधातु-विषयः कृतो भवति।<br>का. भावे 3.3.18 |



# षष्ठीविमर्शः

**डॉ.सि.एस्.एस्.नरसिंहमूर्तिः**

अष्टाध्याय्यां द्वितीयाध्याये तृतीयपादे षष्ठीविधायकानि सूत्राणि एकविंशतिः सन्ति। तत्रैव द्वे निषेधसूत्रे स्तः। विकल्पेन षष्ठीविधायकानि त्रीणि विद्यन्ते। आहत्य 21 + 2 + 3 = 26 सूत्राणि सिद्धान्तकौमुद्यां प्रकरणेऽस्मिन् आसन्। प्रकरणमिदं त्रिधा व्यभज्यत।

1. शेषषष्ठी
2. कारकषष्ठी
3. उपपदषष्ठी इति

**1. शेषषष्ठी –** षष्ठी शेषे (2.3.50) इति सूत्रेण विहिता या षष्ठी सा शेषषष्ठी इति व्यवह्रियते। कः शेषः? इति जिज्ञासायाम् उक्तादन्यः शेषः इति फलति। अस्य सूत्रस्य पूर्वं 'कर्मणि द्वितीया' (2.3.2) इत्यारम्भ 'प्रातिपदिकार्थलिङ्ग-परिमाणवचनमात्रे प्रथमा' (2.3.46) इति यावत् षट् कारकाणि प्रातिपदिकार्थं च उवाच सूत्रकारः। अतः शेषपदेन तद्भिन्नः ग्राह्यः। सः कः? इति चेत्–स्वस्वामिभावः--जन्यजनकभावः–अवयवावयविभावः इत्यादयो भवन्ति। राज्ञः पुरुषः इत्यत्र स्वस्वामिभावः सम्बन्धः षष्ठ्यर्थः। दशरथस्यापत्यम् इत्यत्र जन्यजनकभावः षष्ठ्यर्थः। वृक्षस्य शाखा इत्यत्रावयवावयविभावः षष्ठ्यर्थः। सम्बन्धस्य स्वरूपमेवं भर्तृहरिणा वाक्यपदीये प्रोक्तम्–

**सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।**
**श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते।।** इति।। (वा.प.3.7.156)

सम्बन्धः सर्वदा क्रियाकारकपूर्व एव भवति। 'मातुः स्मरति' इत्यत्र श्रूयमाणक्रिया कर्मत्वादिकं विद्यमानमप्यविवक्षित्वा तन्मूलके विशेष्यविशेषणभावरूपे सम्बन्धे विवक्षिते षष्ठी भवति। राज्ञः पुरुषः इत्यत्र सिद्धस्वभावानां द्रव्याणां क्रियां विना परस्परं सम्बन्धासम्भवात् सम्बन्धलक्षणकार्याऽनुपपत्त्या काचन क्रियाऽनुमेया। सा च 'राजा पुरुषाय ददाति' इत्यर्थसम्प्रत्ययात्तयोः दानादिना स्वीकरणातिरिक्तसम्बन्धहेत्वभावाच्च

दानादिरूपैव। एवञ्च अनुमीयमानदानादिक्रियाकर्तृत्वस्य राज्ञि सत्त्वेऽपि तदविवक्षितत्वात्तन्मूलकस्वस्वामिभावस्यैव विवक्षायां षष्ठी भवति। तथा वृक्षस्य शाखा इत्यत्र अधिकरणक्रियाभावमूलकेऽवयवावयविभावरूपे सम्बन्धे विवक्षिते षष्ठी प्रवर्तते। एवञ्च क्रियाकारकसम्बन्धः कारणं, शेषसम्बन्धस्तु फलभूतः।

अयञ्च सम्बन्धः राज्ञः पुरुषः इत्यत्र स्वस्वामित्वसमूहः सम्बन्धः। न तु केवलस्वत्वं स्वामित्वं वा सम्बन्धः। तयोः एकमात्रवृत्तितया सम्बन्धत्वायोगात्। सम्बन्धिभ्यां भिन्नस्योभयनिष्ठस्यैव सम्बन्धत्वात्। अयञ्च षष्ठ्यर्थसम्बन्धः संसर्गतयैव भासते। आह चात्र सूत्रे भाष्ये-राज्ञः पुरुषः इत्यत्र राजा विशेषणं, पुरुषो विशेष्यः इति। अन्यथा सम्बन्धमपि विशेष्यतया विशेषणतया वा ब्रूयात्।

सर्वत्र कारकेषु क्रियाकारकसम्बन्धः बोध्यते। द्वितीयादिस्थलेषु कर्मत्व-करणत्वादीनि तत्तद्रूपेण बोध्यन्ते। षष्ठीस्थले तु सम्बन्धसामान्यरूपेण क्रियाकारकसम्बन्धः बोध्यते। एवञ्च क्रियाकारकभावस्य तत्तद्रूपेण द्वितीयादिभिः उक्तत्वेऽपि सम्बन्धसामान्यरूपेणानुक्तत्वात्तेन रूपेण तस्य शेषत्वमिति बोध्यम्। अत एव षष्ठी शेषे (2.3.50) इत्यस्यार्थ एवं वर्ण्यते-कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावसम्बन्धः शेषः, तत्र षष्ठी भवति इति।

राज्ञः पुरुषः इति स्वस्वामिभावसम्बन्धस्योदाहरणं भवति।

दशरथस्य अपत्यम् इति जन्यजनकभावसम्बन्धस्योदाहरणं भवति।

वृक्षस्य शाखा इति अवयवावयविभावसम्बन्धस्योदाहरणं भवति।

अत्रेयं शङ्का उदेति यत्-सम्बन्धस्य द्विष्ठत्वेन उभयत्रापि षष्ठ्या भाव्यं खलु? परं निरुक्तप्रयोगेषु विशेषणवाचकादेव षष्ठी दृश्यते, न तु विशेष्यवाचकात्। कुत इति-

उच्यते। आह चात्र सूत्रे भाष्ये-राज्ञः पुरुषः इत्यत्र राजा विशेषणं, पुरुषो विशेष्यः इति। विशेषणस्य राज्ञः अप्राधान्यम्, पुरुषस्य विशेष्यत्वेन प्राधान्यम्। अप्रधाने एव षष्ठी भवति। उक्तञ्च हरिणा वाक्यपदीये-

**द्विष्ठोऽप्यसौ परार्थत्वात् गुणेषु व्यतिरिच्यते।**

**तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते।।** इति।।(वा.प.3.7.157)

परार्थत्वाद् गुणानां परं प्रति विशेषणत्वेन विवक्षितत्वादित्यर्थः। अयं भावः-भेदे सति विशेषणतया विवक्षितस्य सम्बन्धं विना विशेषणत्वासम्भवेन तदाकाङ्क्षितत्वात्तत्र सम्बन्धो व्यतिरिच्यते = उद्भूततया प्रतीयते। अतस्तत्रैव षष्ठी भवति। तत्र प्रवृत्ता षष्ठी विशेष्यगतसम्बन्धमपि बोधयति।



शेषषष्ठ्यन्तस्य समासो भवति। यथा-राज्ञः पुरुषः = राजपुरुषः इति।

क्वचित् कर्म-करण-अधिकरणानां शेषत्वेन विवक्षया षष्ठी विधीयते। यथा-अधीगर्थदयेशां कर्मणि (2.3.52) अत्र कर्मणः शेषत्वेन विवक्षा। उदा.-मातुः स्मरणम्।

ज्ञोऽविदर्थस्य करणे (2.3.51) अत्र करणस्य शेषत्वेन विवक्षा। सर्पिषो ज्ञानम्।

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे (2.3.64) अत्र अधिकरणस्य शेषत्वेन विवक्षा। उदा.-द्विरह्नो भोजनम्।

पूर्वोक्तेषु स्थलेषु समासो न भवति-प्रतिपदविधाना षष्ठी न समस्यत इति वाच्यम् इति वार्तिकेन निषेधात्। अत्रापि यदि समासः तर्हि शेषे इत्यनेनैव सिद्धौ पृथग्विधानं व्यर्थं स्यात्। तादृशफलितार्थमेव वार्तिकम् अनुवदति, नापूर्वार्थकम्।

कर्मादीनां तत्त्वेनाविवक्षया सम्बन्धत्वेन विवक्षायां शेषे षष्ठी भवति। कर्तुः सर्वेषां कारकाणामपेक्षया प्राधान्यात्तस्य सम्बन्धत्वेन विवक्षा भवति न वेति सन्देहो जायते। यतः कर्तुः प्राधान्यात् प्रतिनिधेरभावाच्चेति जिज्ञासायां शेखरकारोऽब्रवीत्-

कर्तुरपि तथा विवक्षा शास्त्रसम्मता। अत्र च प्रमाणम्-छात्रस्य हसितम् इति क्तस्य च वर्तमाने इति सूत्रे भाष्ये भगवतः प्रयोग एव।

**2. कारकषष्ठी**-केषाञ्चन कृदन्तानां योगे कर्तरि कर्मणि च षष्ठी विधीयते। सा च कारकषष्ठी इति व्यवह्रियते। यथा-'कर्तृकर्मणोः कृति' (2.3.65), 'उभयप्राप्तौ कर्मणि' (2.3.66) इति सूत्राभ्यां विहिता षष्ठी। रामस्य गमनम्, श्लोकस्य पाठकः, पयसः पानं बालकेन इत्युदाहरणानि।

कर्तृकर्मणोः कृति (2.3.65) इति विहितायाः षष्ठ्याः समासो भवति-'कृद्योगा च षष्ठी समस्यत इति वाच्यम्' इति वार्तिकेन समासविधानात्।

उभयप्राप्तौ कर्मणि (2.3.66) इति विहितायाः षष्ठ्याः समासो न भवति। कर्मणि च (2.2.14) इत्यनेन निषेधात्। साक्षाद् यत्र कर्तृकर्मादीनां षष्ठी विधीयते सा कारकषष्ठी इति व्यवह्रियते। अस्याः क्वचित्समासो भवति, क्वचिन्न इति लभ्यते।

**3. उपपदषष्ठी**-समीपे विद्यमानं पदं निमित्तीकृत्य विधीयमाना षष्ठी उपपदषष्ठी भवति। यथा-'षष्ठी हेतुप्रयोगे' (2.3.26), 'सर्वनाम्नस्तृतीया च' (2.3.27) इत्यादिसूत्रैः विहिता। उदा.-अन्नस्य हेतोः वसति, कस्य हेतोः? इति।

शेषे इति क्वानुवर्तते? क्व नानुवर्तते? इत्यत्र दीक्षित-नागेशयोः मतभेदो विद्यते। तमंशं सम्प्रति वयं परिशीलयामः।

दीक्षिताः एवममन्यन्त-शेषे इति ज्ञोऽविदर्थस्य करणे (2.3.51) इति सूत्रादारभ्य व्यवहृपणोः समर्थयोः (2.3.57) इति यावद् अनुवर्तते। पुनः 'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' (2.3.64) इति सूत्रे तु अनुवर्तते।

मध्ये वर्तमानेषु दिवस्तदर्थस्य (2.3.58), द्वितीया ब्राह्मणे (2.3.51), विभाषोपसर्गे (2.3.59) इत्यादिषु न सम्बध्यते। अत एव ते सिद्धान्तकौमुद्याम् एवं व्याख्यन्-

ज्ञोऽविदर्थस्य करणे (2.3.51) जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यादिति।

व्यवहृपणोः समर्थयोः (2.3.57) शेषे कर्मणि षष्ठी स्यादिति।

कृत्वोऽर्थप्रयोगे कालेऽधिकरणे (2.3.64) कृत्वोऽर्थानां प्रयोगे कालवाचिन्यधिकरणे शेषे षष्ठी स्यादिति।

दिवस्तदर्थस्य (2.3.58) द्यूतार्थस्य क्रयविक्रयरूपव्यवहारार्थस्य च दिवः कर्मणि षष्ठी स्यादिति। कुतो दिवस्तदर्थस्य इत्यत्र नानुवर्तते इत्याशङ्कायाम् एवमवादिषुस्ते दिवस्तदर्थस्य इति सूत्रे शेष इत्यस्य सम्बन्धे विभाषोपसर्गे इत्युत्तरसूत्रे तस्य सम्बन्धोऽस्ति न वा? नाद्यः, दिवस्तदर्थस्येत्यनेनैव समासाभावस्य सिद्धत्वेन सूत्रवैयर्थ्यापत्तेः।

न च पक्षे शेषे षष्ठी इत्यस्य प्रवृत्त्या पक्षे षष्ठीसमासः फलमिति वाच्यम्।

नोपसर्ग इति न्यासेन दिव इत्यस्य निषेधे शेषषष्ठ्यां समासविकल्पेन रूपद्वयस्य सिद्धतया विभाषाग्रहणस्यैव व्यर्थत्वात्।

नान्त्यः। वेदेऽपि विभाषोपसर्गे इति सूत्रेण सोपसर्गे कर्मणि द्वितीयायाः सिद्धत्वेन छन्दस्यापाद्यरूपाभावेन च निरुपसर्गेऽपि कर्मत्वविवक्षायां दिवस्तदर्थस्येत्यस्याप्रवृत्त्या कर्मणि द्वितीयेत्यनेनैव द्वितीयायाः सिद्धतया च द्वितीया ब्राह्मणे इत्यस्य वैयर्थ्यापत्तेः।

न च तत्र शेषग्रहणानुवृत्त्या कर्मत्वाविवक्षायां द्वितीयार्थं तदिति वाच्यम्।

मध्ये विच्छिन्नत्वेनानुवृत्तेरयुक्तत्वात्।

न च कर्मणि द्वितीयायाः सिद्धत्वेन द्वितीया ब्राह्मण इति पुनर्विधानसामर्थ्यात् समासाभावः स्यादिति वाच्यम्।



कृदन्ते लक्ष्याभावात्तदप्रवृत्तेः। अत एव शतस्य दीव्यति इति तिङन्तमेवोदाहृतम्, न तु कृदन्तम्। अतः दिवस्तदर्थस्येति सूत्रे एव तदनुवृत्तिः नास्तीति भाष्यकाराणामाशय इति।

अधीगर्थदयेशां कर्मणि इति सूत्रे भाष्ये 'कर्मा दिष्वकर्मकवद्वचनम्' इति वार्तिककारेणोक्तम्। तत्र भाष्यकार एवमुवाच-कर्मादिष्वकर्मकवद्भावो वक्तव्यः। किं प्रयोजनम्? अकर्मकाणां लो भवतीति भावे लो यथा स्यात्-मातुः स्मर्यते, पितुः स्मर्यते इति। अथ वत्करणं किमर्थम्? स्वाश्रयमपि यथा स्यात्-माता स्मर्यते, पिता स्मर्यते इति। तदनन्तरमन्ते शेषश्च कः? कर्मदीनामविवक्षा शेषः। यदा च कर्म विवक्षितं भवति तदा षष्ठी न भवति इति च।

अनेन भाष्येण मातुः स्मर्यत इत्यादौ भावे लकृत्यक्तखलर्थाः भवन्ति। अन्यथा कर्मणि लादिषु विधीयमानेषु कर्मणोऽभिहितत्वात्षष्ठ्यप्राप्त्या प्रथमैव स्यान्माता स्मर्यत इति, न तु षष्ठी। सूत्रं तु मातुः स्मरणमित्यादौ कृतार्थम्। अकर्मकवद्वचने तु वत्करणेन स्वाश्रयकार्यानिवृत्त्या रूपद्वयसिद्धिरिति। भाष्यान्ते विद्यमानेन कर्मादीनामित्यादिपदेन ज्ञोऽविदर्थस्य करणे इत्यत्र करणस्य कृत्वोऽर्थप्रयोगे कालेऽधिकरणे इत्यधिकरणस्य च ग्रहणे बहुवचनमुपपन्नं भवति, नान्यथा। अतोऽत्रापि शेषपदसम्बन्धः।

दिवस्तदर्थस्येति सूत्रे शेषपदासम्बन्धादेव 'द्वितीया ब्राह्मणे' इति सूत्रं 'गामस्य तदहः सभायान्दीव्येयुः' इत्यत्र नित्यं षष्ठीप्राप्तौ द्वितीयार्थमिति भाष्ये उक्तम्। तेषामयमाशयः-गामित्यत्र कर्मणि द्वितीयेत्यनेन प्राप्तां द्वितीयां बाधित्वानेन नित्यं षष्ठीप्राप्तौ तद्वारणाय 'द्वितीया ब्राह्मणे' इति सूत्रमिति तदाशयः। यद्यत्र शेषपदसम्बन्धः स्यात्तदा शेषत्वेन विवक्षायामेवानेन षष्ठीविधानाच्छुद्धे कर्मणि 'कर्मणि द्वितीये' त्यनेनैव सिद्धे तद् व्यर्थं स्यात्। शेषपदासम्बन्धे तु शुद्धे एवानेन षष्ठीति तत्प्राप्त्या तद्वारणाय 'द्वितीया ब्राह्मणे' इति सूत्रं सार्थकम्। 'द्वितीया ब्राह्मणे' इत्यत्र तु न शेषपदसम्बन्धः, मध्ये विच्छिन्नत्वात्। दिवस्तदर्थस्येति सूत्रे शेष इत्यस्य असम्बन्धादेव भाष्यकारः शतस्य दीव्यतीति उदाजहार। अन्यथा यदि तत्सम्बन्धेनेदमपि समासनिवृत्तिमात्रफलकमेव स्यात्तदाऽन्यत्रेवात्रापि समासप्राप्तियोग्यं कृदन्तमेवोदाहरेत्।

नागेशभट्टाः एवमवादिषुः – यदि दिवस्तदर्थस्य इति सूत्रेऽपि शेष इत्यस्यानुवृत्तिरभिलषिता स्यात्तदा 'व्यवहृपणदिवां समर्थानाम्' इत्येकमेव योगं कुर्यात् उभयोः सूत्रयोः समानविषयत्वात्। तथाऽकृत्वा पृथग्योगकरणेन दिवस्तदर्थस्येति सूत्रे शेष

इत्यस्य सम्बन्धो नास्तीति आचार्याणामाशयः इति मनसि निधाय शब्देन्दुशेखरे दिवस्तदर्थस्य इति सूत्रव्याख्यानसन्दर्भे 'शेष इति त्वत्र न सम्बन्ध्यते व्याख्यानात्' इति।

अधीगर्थदयेशां कर्मणि इति सूत्रे भाष्ये षष्ठी शेषे इत्यनेन हि कर्मादीनां षण्णामपि कारकाणामविवक्षायां षष्ठीविधानात्तत्र कश्शेषः? इति प्रश्ने कर्मादीनामविवक्षा शेष इति बहुवचनमुपात्तम्। तत्र बहुवचननिर्देशस्य दीक्षितोक्तार्थवर्णनमयुक्तम्। शेषे षष्ठी इति सूत्रेऽऽदिपदस्य सार्थकत्वेन स्मृतवाक्यस्यादिपदस्य पृथगत्र सार्थक्योपपादनानपेक्षणेन तद्बलेनात्रार्थान्तरकल्पनस्यानौचित्यात्।

'कर्मादिष्वकर्मकवद्वचनम्' इति वार्तिकस्यायमर्थः - कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणाम् अकर्मकवद्वचनम् इति। अत्र वार्तिके विद्यमानमादिपदं न प्रभृत्यर्थकम्, किन्तु आश्रयार्थकम्। यथा–

**विष्णुरादिः पृथासूनोः भीष्मादिश्च सुयोधनः।**
**ते जयन्ति रणे शत्रून् येषां विष्णुः समाश्रयः।।**

कैयटाचार्यः एवमकथयत्-कर्माश्रयाः द्वितीयापवादषष्ठीविधिनिमित्तत्वेनोपात्ताः सकर्मका अधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्मादिशब्देनोच्यन्त इति। अतः पूर्वोक्तवचनेन तन्मध्ये करणाधिकरणयोरभावाच्छेषग्रहणानुवृत्त्या तत् (वार्तिकं) प्रत्याख्यानेऽपि तयोः ग्रहणमयुक्तमित्याशयः।

वस्तुतस्तु दिवस्तदर्थस्येति सूत्रेऽपि शेषपदसम्बन्ध आवश्यकः।

शेषपदानुवृत्त्या वार्तिकप्रत्याख्याने तु दिव इत्यत्र तदसम्बन्धेऽकर्मकत्वाभावाद् भावे लकाराप्राप्त्या कर्मणि लकारे कर्मणोऽभिहितत्वात् षष्ठ्यप्राप्तौ शतं दीव्यत इत्येव स्यान्न तु षष्ठी। सूत्रं तु शतस्य देवनमित्यादौ कृतार्थं, तत्र तत्सम्बन्धे त्वविवक्षितकर्मत्वेनाकर्मकत्वादिष्टसिद्धिः। एवञ्चारम्भप्रत्याख्यानयोः फलाभेदाय तत्रापि शेषपदसम्बन्धः।

यथा शेष इत्यस्यानुवृत्त्या कर्मादिष्वकर्मवद् भावो वक्तव्यः इति वार्तिकं प्रत्याख्यातं तथा दिवस्तदर्थस्य, विभाषोपसर्गे इत्यनयोरपि प्रत्याख्यानमेव भगवतः तात्पर्यम्।

न च सोपसृष्टे समासविकल्पार्थं विभाषोपसर्ग इत्यावश्यकमिति वाच्यम्। दिवः कर्मणः कर्मत्वेन विवक्षायां कारकषष्ठ्या समासस्य, शेषत्वेन विवक्षायां दिव इत्यनेन षष्ठ्यां समासाभावस्य च सिद्ध्या तच्च सूत्रं नावश्यकम्। एवञ्च दिवस्तदर्थस्येत्यस्य शेषत्वविवक्षायां प्रवृत्त्या कर्मत्वेन विवक्षायां कर्मणि द्वितीयेत्यनेन द्वितीयासिद्धौ द्वितीया ब्राह्मणे इत्यस्य वैयर्थ्येन प्रत्याख्यानं युज्यते।



न च द्वितीया ब्राह्मणे (2.3.60) इति सूत्रकैयटग्रन्थविरोधः। तत्र हि-गामस्य तदहः सभायां दीव्येयुः इत्यत्र दिवस्तदर्थस्येति नित्यं षष्ठी प्राप्नोति। अत्र च शेष इति नानुवर्तत इति एतत्सूत्रारम्भात्पूर्वसूत्रारम्भाच्च ज्ञायते इति। दिवस्तदर्थस्येत्यस्य प्रत्याख्याने तु शेष इति नानुवर्तत इति कथनं कथं सङ्गच्छते?

उच्यते, अयञ्च कैयटग्रन्थः वार्तिककाररीत्या। दिव इति सूत्रे शेष इत्यस्य निवृत्तिः व्याख्यानादेव। 'नोपसर्ग' इत्यत्र 'विभाषोपसर्ग' इत्यतः पदलाघवाऽभावात्तिङन्ते रूपद्वयार्थं विभाषाग्रहणस्यावश्यकत्वाच्च। कृति तु प्रतिपदविधानेति निषेधात् षष्ठीसमासाऽभाव एव। अत एव भाष्यकृता न प्रत्याख्यातम्।

ज्ञोऽविदर्थस्य करणे इति सूत्रे शेष इत्यस्याननुवृत्तावपि अधीगर्थदयेशां कर्मणि इत्यत्रानुवृत्तिः मण्डूकप्लुत्याऽनुवर्तते। ज्ञोऽविदर्थस्य करणे इत्यत्र तु तदसम्बन्ध एव। एवञ्च तद्योगे न कदापि तृतीया – तद्विहितषष्ठ्याः तृतीयाबाधकत्वात्। (दिव इत्यत्र शेषपदासम्बन्धे तु कर्मत्वशक्तिमत्त्वेन विवक्षायां द्वितीयां बाधित्वा तेन षष्ठ्यां तदसिद्धिः। तत्सम्बन्धे तु शेषत्वेन विवक्षायां शतस्य दीव्यतीति, कर्मत्वेन विवक्षायां शतं दीव्यतीति रूपद्वयसिद्धिः।)

अत्रेदं तत्त्वम् – श्रीमान् भट्टोजीदीक्षितः कैयटानुयायीति वैयाकरणनिकाये वरीवर्ति। अत्र तु विरुद्धमस्ति। सर्वदा कैयटं खण्डयति नागेशः। अत्र कैयटवचनं नागेशः अन्वमन्यत। दीक्षितः विरुणद्धि। अनेन ज्ञायते – भाष्यार्थतत्त्वनिर्णये युक्तिः प्रबला। अतो युक्तिरेव गरीयसी न तु व्यक्तिः।

❖

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।
अ0 = अष्टाध्यायी। वा0 = वार्तिकम्

मुष्टिः — मुष्टिः अङ्गुलिसन्निवेशः
का. सॅम मुष्टौ 3.3.36

अभ्रेषः — पदार्थानाम् अनपचारो यथाप्राप्तकरणम् अभ्रेषः
का. परिन्योर्नीणोर्द्यूताभ्रेषयोः 3.3.37

अनुपात्ययः — क्रमप्राप्तस्य अनतिपातः अनुपात्ययः, परिपाटी
का. परावनुयात्यय इण 3.3.38

निवासः — निवसन्ति अस्मिन्निति निवासः
का. निवासचितिशरीरोपसमाधानेष्वादेश्च कः 3.3.41

चितिः — चीयतेऽसौ चितिः
शरीरम् — पाण्यादिसमुदायः शरीरम्
उपसमाधानम् — राशीकरणम् उपसमाधानम्
का. 3.3.41

संघः — प्राणिनां समुदायः संघः
स च (संघः) द्वाभ्यां प्रकाराभ्यां भवति–एकधर्मसमावेशेन औत्तराधर्येण वा
का. संघे चानौत्तराधर्ये 3.3.42

कर्मव्यतिहारः — कर्म क्रिया। व्यतिहारः परस्परं करणम्।
कर्म — कर्म क्रिया
व्यतिहारः — व्यतिहारः परस्परं करणम्
का. कर्मव्यतिहारे णच् स्त्रियाम् 3.3.43

अभिविधिः — अभिविधिः अभिव्याप्तिः क्रियागुणाभ्यां कात्स्न्र्येन सम्बन्धः
का. अभिविधौ भाव इनुण् 3.3.44



# तद्धितानां भेदस्वरूपे

बन्दिता शतपथी

विभक्त्यन्तपदात् विधीयमानप्रत्ययस्य पाणिनिः अन्ये वैयाकरणाश्च तद्धितेति[1] संज्ञां स्वीकुर्वन्ति। अस्याः संज्ञायाः प्रयोगं पाणिनिमतिरिच्च हेमचन्द्रः, शर्ववर्मा, अनुभूतिस्वरूपः धर्मकीर्तिश्च कुर्वन्ति। अस्या व्युत्पत्तिः सारस्वतव्याकरणे एवं प्रसादटीकायामुपलभ्यते। 'तत्' एवं च 'हित' इति शब्दयोः समासो भवति। हितस्य योगे चतुर्थीविभक्तेः प्रयोगात् 'तस्मै ताभ्यां वा हितं हितो हिता वा 'तद्धिताः' एतत् विग्रहवाक्यं सम्पन्नं भवति। तत्पदेन अत्र तद्धितप्रत्ययेभ्यः पूर्वं सुबन्तपदं परामृश्यते। यः प्रत्ययः तद्धितेतिशब्देन व्यवह्रियते। एतत्कथनेन ध्वनितं भवति यद् भाषायाम् अस्य प्रयोगः ऐच्छिकः वैकल्पिकश्च। यदि देवदत्तस्य पुत्रः इत्यर्थे तद्धितप्रत्ययः इष्यते चेत् तर्हि दैवदत्तिः पदस्य प्रयोगं करोति लोकः अन्यथा 'देवदत्तस्य पुत्रः' अथवा 'देवदत्तपुत्र' इदं पदमपि प्रयुज्यते। एतत्सम्बद्धः प्रत्ययः अर्थान्तरस्य अभिव्यञ्जकः। एवं च पर्यालोचयिष्यमाणानां प्रत्ययानां 'तद्धितः' इति महासंज्ञाकरणात् स्पष्टं भवति यत् सुबन्तानां विकल्परूपेण अयं विहितो भवति।

## प्रकृतिः

अत्र प्रश्नः उपस्थितो भवति यत् 'पचतितमाम्[2]' इत्यादिरूपेषु तिङ्प्रत्ययस्य श्रुतिः एवं च तदनन्तरं तद्धितसंज्ञकस्य 'तपम्' प्रत्ययस्य दर्शनं भवति तद्वत् दैवदत्तिः इत्यादितद्धितान्तपदेषु विभक्तिकल्पना एवं च तदन्तस्य प्रत्ययकल्पना विधानकल्पनाप्रसूता भवति। अस्य प्रश्नस्य समाधानं 'कुत्सिते'[3] इति सूत्रभाष्ये पतञ्जलिः करोति। तत्र स्पष्टं भवति यत् स्वार्थ-द्रव्य-लिङ्ग-संख्या-कारकैः परिपूर्णं पदं पदान्तरेण सम्बन्ध्यते। एवमेतदर्थपरिपूर्णं विभक्त्यन्तं पदं भवति।

अतः तेषां पुत्रः यदि अर्थान्तरेण सम्बद्धो भवति तस्य अर्थान्तरस्य तद्धितप्रत्ययः बोधको भवति, यावत्पर्यन्तं प्रातिपदिकं विभक्त्या सह संयोगं न प्राप्नोति

तावत्पर्यन्तमर्थान्तरेण न सम्बद्ध्यते। सुबन्तात् तद्धितप्रत्ययः उत्पन्नः सन् सुबन्तप्रकृतेरर्थं बोधयति, तद्धितान्तत्वात्[4] प्रातिपदिकसंज्ञायां सुब्लुग् भवति। अतः परिनिष्ठिते तद्धितान्तरूपे विभक्तिश्रुतिः न ज्ञायते किन्तु यः प्रत्ययः विभक्तेः अन्ते संयुक्तो भवति, तस्य संयोगानन्तरं विभक्तेर्लुकि कृतेऽपि तदर्थबोधो भवत्येव।

## स्वार्थिकतद्धितः

एतत्पर्यन्तमनेन वाक्येन स्पष्टं भवति यत् तद्धितप्रत्ययः सुबन्तपदात् विहितो भवति एवं च तस्य विधानानन्तरं सुब्विभक्तेः सर्वत्र लुग् भवति। अत्रेदमवधेयं भवति यत् सर्वे तद्धित-प्रत्ययाः सुबन्तपदात् विहिताः भवन्ति। यतो हि स्वार्थेन परिपूर्णं पदं पदार्थान्तरेण सम्बद्ध्यते। एवं स्वार्थपरिपूर्णता च विभक्तिविधानादेव भवति। यदा किञ्चित् पदं स्वकीयं सर्वमर्थं व्यक्तीकरोति सोऽर्थो भवति जातिः- व्यक्तिः लिङ्ग संख्या एवं च कारकम्। प्रायशः प्रत्येकं पदं पञ्च अर्थान् बोधयति। किन्तु यः तद्धितप्रत्ययः प्रकृत्यर्थस्य उत्कर्षापकर्षमात्रं प्रकटीकरोति अथवा केवलं प्रकृत्यर्थस्य [5]अभिधानं करोति सः प्रातिपदिकाद् विहितो भवति। कारणं तस्य अर्थः प्रकृत्यर्थेन अभिन्नो भवति। अतः अस्य विधानं विभक्तिं न अपेक्षते। एतत्प्रकारेण तद्धितः स्वार्थिकः तथा च अत्यन्तस्वार्थिकः इति नाम्ना व्यवह्रियते अर्थात् यस्तद्धितः प्रकृत्यर्थस्य वैशिष्ट्यमात्रं बोधयति। अतिशयेन पटुः इति पटुतमः, ह्रस्वः बालः इति बालकः इत्यादिषु तमप्प्रत्ययेन कप्रत्ययेन च प्रकृत्यर्थौ अतिशयता एवं च ह्रस्वता बोध्येते। यो हि तद्धितप्रत्ययः स्वार्थिको भवति तस्य विधानं प्रातिपदिकप्रकृतेः भवति। अत एव वैयाकरणाः "समर्थानां प्रथमाद् वा" सूत्रस्य अधिकारं 'प्राग्दिशो विभक्तिः' पर्य्यन्तं स्वीकुर्वन्ति। अतोऽधिकाराद् बहिर्भूतैः सूत्रैः विधीयमानः प्रत्ययः स्वार्थिको भवति। अतः तस्य प्रकृतेः समर्थता तथा सुबन्तता आवश्यकी न भवति। एते स्वार्थिकप्रत्ययाः सिद्धान्तकौमुद्यां भट्टोजिदीक्षितेन प्राग्दिशीयप्रकरणे एवं प्रागिवीय-प्रकरणे प्रातिपदिताः सन्ति।

## अत्यन्तस्वार्थिकतद्धिताः

एतदतिरिक्ताः अपि तद्धितप्रत्ययाः सन्ति एतान् नागोजिभट्टः अत्यन्तस्वार्थिकाः इति वदति। ये प्रत्ययाः प्रकृत्यर्थे वैशिष्ट्योत्पादनं न कुर्वन्ति अपि तु केवलं



प्रकृत्यर्थं बोधयन्ति। यथा-प्रज्ञः एव प्राज्ञः इत्यादिरूपेण तद्धितप्रत्ययः 'अण्'-प्रकृत्यर्थमात्रम् अभिदधाति। ये प्रत्ययाः प्रतिपदिकप्रकृतिभ्यो विहिताः एवं च प्रकृतिमध्ये विहिताः तत्र विभक्तिः अपेक्षिता न भवति।

भट्टोजिदीक्षितः स्वार्थिकप्रकरणान्तर्गतं तेषामध्ययनं प्रस्तौति। यद्यपि भट्टोजिदीक्षितेन तेषाम् 'अत्यन्तस्वार्थिकम्' इति नामकरणं न कृतम् तथापि तत्तच्छब्देभ्यो विधीयमानाः प्राग्दिशीयाः एवं च प्रागिवीयाः प्रत्ययाः स्वार्थिकाः भवन्ति तथा च तेषां भेदबोधनाय कांश्चित् प्रत्ययान् पृथक्तया 'स्वार्थिकप्रकरणे' कल्पयित्वा तत्र परिगणिताः सन्ति। यदि एते स्वार्थिकाः इति उच्यन्ते तर्हि तद्भिन्नप्रत्ययान् कोऽपि स्वार्थिकाः इति वदति चेत् परस्परं विरुद्धं किमपि दृष्टिगतं भवति। अतो भट्टनागेशः अत्यन्तस्वार्थिकशब्देन चर्चां करोति, तथाविधशैल्या भट्टोजिदीक्षितद्वारा अनुक्ता अपि अर्थविज्ञानस्य दृष्ट्या ते तद्धितप्रत्ययाः स्वार्थिकाः एवमप्यन्तस्वार्थिकाः इति भेदेन तेषां विभागाः भवन्ति।

## निष्कर्षः

तथा चास्मिन् प्रघट्टके स्वार्थिकानाम् अत्यन्तस्वार्थिकानां तद्धितप्रत्ययानां चर्चा भवति। एतद् द्विप्रकारकाः तद्धितप्रत्ययाः प्रातिपदिकप्रकृतेः विहिताः भवन्ति। अतः एतेषां विभक्त्यन्तप्रत्ययनामके स्तबके विवेचना न भवति। अत्र केवलं स्वार्थिकतद्धितप्रत्ययस्य विवेचनं भवति। ये प्रकृत्यर्थात् सर्वथा भिन्नम् एवं च सम्बद्धार्थं च अभिदधते, एते विपरीतस्वार्थिकाः तरप्तमबादयः तिङन्तेभ्यः पदेभ्योऽपि विधीयन्ते। एतदतिरिक्ताः अस्मिन् स्तबके सर्वे प्रत्ययाः विभक्त्यन्तप्रकृतिभ्यो विहिताः भवन्ति।

## अध्ययनप्रणाली

तद्धितप्रत्ययानां सामान्यार्थः[6] सम्बन्धः इति भवति। यथा-राष्ट्रियः = राष्ट्रसम्बन्धी, गव्यम् = गोसम्बन्धी, औपगवः = उपगुसम्बन्धी इत्यादिरूपेण सम्बन्धसामान्यस्य प्रतीतिः यद्यपि सर्वत्र भवति, तथापि एते प्रत्ययाः सम्बन्धविशेषं बोधयन्ति। अतः सम्बन्धविशेषबोधकाः तद्धितप्रत्ययाः इमे भवन्ति। केचन तद्धितप्रत्ययाः विशेषार्थे भवन्ति। अतो वैयाकरणवैज्ञानिकप्रणाल्या इमे विशेषार्थनिर्धारकाः भवन्ति। एतस्मादेव कारणात् पाणिनिना स्वस्मिन् व्याकरणग्रन्थे अधिकारतः प्रत्ययकल्पना कृता। अत

एव तत्तदधिकारे तेषु तेषु अर्थेषु विशेषप्रकृतिभ्यः विशेषप्रत्ययानाम् अनुशासनं भवति।

एतस्य अभिप्रायो भवति यत् यस्मिन् अर्थे यः प्रत्ययः अधिकाराद् भवति सः अधिकारार्थं बोधयति। प्रकृतिविशेषेभ्यो विधीयमानाः आधिकारिकाः प्रत्ययाः तत्तत्प्रकृतिसंयुक्ताः अधिकृतार्थस्य बोधकाः भवन्ति। यथा प्राग्दीव्यतीयार्थे आधिकारिकः प्रत्ययः अण् भवति। एतस्मिन् अर्थे यदि प्रकृतिविशेषात् प्रत्ययविशेषस्य अनुशासनात् प्रथमतः आधिकारिकप्रत्ययः 'अण्' भवति तर्हि ते अर्थाः 'प्राग्दीव्यतीयाः' उच्यन्ते।

केचन प्रत्ययाश्च 'तेन रक्तं रागात्'[7] इत्यधिकारे भवन्ति। एते रक्ताद्यर्थेति शब्देन उच्यन्ते। विकाराद् अविशिष्टाः अर्थाः शैषिकप्रकरणे पठिताः सन्ति येषां नामकरणं शेषार्थः इति भवति। एतदतिरिक्ताः प्रायशः त्रिंशत् प्रत्ययाः चतुर्षु अर्थेषु विहितास्ते 'चातुरर्थिकप्रत्ययाः' इत्युच्यन्ते। प्राग्दीव्यतीयेषु अर्थेषु अवान्तरसंज्ञा न दृष्टिगोचरायते। अत एव तत्र प्रकृतेः आधिकारिकः 'अण्' प्रत्ययो भवति। अनेन प्रकारेण पाणिनिप्रभृतिवैयाकरणैः कल्पितानां तद्धितप्रत्ययानाम् अर्थपरकमध्ययनं प्रस्तुतं भवति। इदानीं प्रस्तुतलघुशोधप्रबन्धे प्रत्ययपरकविवेचनस्य प्रयासो विधीयते। एतदर्थं यथावश्यकप्रत्ययतालिका प्रस्तूयते-प्रत्ययानां प्रस्तुताध्ययने अनुबन्धदृष्ट्या रूपस्वरादिदृष्ट्या च विकारः क्रियते। कुत्रचित् सानुबन्धकाः, कुत्रचिच्च निरनुबन्धकाः प्रत्ययाः समुपदिष्टाः, कुत्रचित् अनुबन्धद्वयम्, कुत्रचित् व्यञ्जनमात्रमनुबन्धः कुत्रचित् स्वरद्वयमित्यादिरूपेण। पाणिनिसम्मतानुबन्धयुक्तप्रत्ययस्वरूपं प्रकृतिविशेषः अर्थविशेषः तेषामकारादिक्रमेण उदाहरणसहितां तालिकां प्रस्तुत्य विश्लेषणं विधीयते। एतदतिरिक्तमपि अस्मिन् स्तबके हेमचन्द्राद्यन्यवैयाकरणैः मान्यप्रत्ययस्वरूपस्यापि विवेचनमत्र करिष्यते, इदमत्र अवधेयं भवति यत् सर्वेऽपि वैयाकरणाः महर्षिपाणिनेरेव अध्ययनप्रणालीमनुसृत्य प्रवृत्ताः दृश्यन्ते।

## आधिकारिकाः प्रत्ययाः तेषामर्थाश्च

संप्रति आधिकारिकप्रत्ययानां स्वरूपाणि तेषामर्थानां च वर्णनं प्रस्तूयते-अधिकारे विहितस्य अण्प्रत्ययस्य चर्चा कृता। इदानीं द्वितीयस्य आधिकारिकस्य प्रत्ययस्य विश्लेषणं प्रस्तूयते। प्रकृतेः समागतस्य 'ठक्'[8] इत्यस्य स्वरूपं लभ्यते। एतदधिकारे समागतानां प्रत्ययानां प्राग्वहतीयेति संज्ञा भवति।



तृतीयः आधिकारिकः प्रत्ययः 'यत्' इति अस्ति अत्र तकारः अनुबन्धः इति भवति। प्रत्ययस्वरूपं यमात्रमवशिष्यते।

चतुर्थः आधिकारिकः प्रत्ययः 'छ' इति भवति। अस्य प्रकृतिसंयुक्तं स्वरूपम् इय इति भवति। अस्य चतुर्षु अर्थेषु प्रयोगो भवति– 1. हितम् 2. इदमर्थः 3. सम्बन्धी 4. अधिकरणम् इति च। पञ्चमः आधिकारिकः प्रत्ययः 'ठञ्' इत्यस्ति। अस्यापि स्वरूपं ठक्प्रत्ययसमानं भवति, उक्तः प्रत्ययः 'इक'रूपेण प्रकृत्या संयुक्तो भवति। एतदधिकारप्रतिपाद्यः आर्हीयार्थः इति उच्यते।

## अर्थातिदेशः[9]

निर्दिष्टेषु अर्थेषु सामान्यविशेषप्रकृतिभ्यां सामान्यरूपेण विहिताः अनुबन्धरहिताश्चत्वारः प्रत्ययाः सानुबन्धाश्च पञ्च प्रत्ययाः निर्देशपूर्वकं परिगणिताः सन्ति। एतदतिरिक्ता अपि विशेषप्रत्ययाः विहिताः सन्ति। एतद्विपरीताः प्रकृतिविशेषेभ्यो जायमानाः विशेषाः प्रत्ययाः यैः निर्दिष्टार्थादतिरिक्तार्थाः प्रत्ययाः उच्यन्ते।

1. कालवाचिप्रकृतेः भवार्थे विशेषप्रत्ययाः अपि विहिताः सन्ति। ताभ्यः प्रकृतिभ्यो देवतार्थेऽपि प्रत्ययाः भवन्ति। यथा–मासे भवं मासिकम्, एवं मासः देवता अस्य मासिकः। अनेन प्रकारेणेदं सिद्ध्यति यद् द्वयोरपि अर्थयोः शब्दरूपं समानं भवति।

2. धर्मः – प्रकृतिविशेषविधीयमानप्रत्ययसमूहानाम् अर्थो धर्मः।

3. गोत्रवाचकप्रत्ययाः याभ्यः प्रकृतिभ्यः भवन्ति ताभ्य एव आगतार्थेऽपि भवन्ति।

4. जनपदवाचिभ्यस्तथा विधीयन्ते। तेषां स्वामिवाचकशब्देभ्यः समानाः प्रत्ययाः भवन्ति। भवार्थे एवं भक्त्यर्थे च समानाः प्रत्ययाः भवन्ति तद् यथा–अङ्गानां जनपदः अङ्गः अङ्गेषु भवः अङ्गकः, एवम् अङ्गाः जनपदो भक्तिः अस्य अङ्गकः अथवा गङ्गाः क्षत्रियाः भक्तिः अस्य अङ्गकः एतत्प्रकारेण तिसृषु स्थितिषु समानाः प्रत्ययाः भवन्ति।

5. परिमाणवाचिशब्देभ्यो विकारः इत्यर्थे निष्कस्य विकारो वा नैष्किकम्। एवमेव कालवाचिशब्देभ्यः भवे अर्थे यः प्रत्ययः ताभ्य एव प्रकृतिभ्यः देवार्थे एव

कार्य्यार्थे च प्रत्ययाः भवन्ति तद्यथा–प्रावृषि भवं दीयते कार्य्यं वेति प्रावृषेयम्।

अनेन प्रकारेण विवेचनेन अयं निष्कर्षो निःसरति यद् एकस्या एव प्रकृतेः एक एव प्रत्ययः अनेकार्थबोधं करोति। प्रायः अर्थातिदेशोऽयं[10] भवति। कारणं यद् रूपं सामान्यं कथयति तदेव रूपं विशेषसम्बन्धबोधकं भवति।

## अनुबन्धप्रयोजनसमीक्षा

यद्यपि तद्धितप्रत्ययप्रतिपादने तस्य अनुबन्धरहितरूपप्रदर्शनं कुर्यात् तथापि अत्यन्तप्रसिद्धिकारणात् पाणिनिसम्मतां प्रक्रियां दृष्टिगतां कृत्वा हेमचन्द्रः अनुभूति-स्वरूपाचार्यश्च अनुबन्धाः तद्धितस्य सर्वान् भावान् व्यक्तीकर्त्तुं सर्वथा असफलाः, महर्षिपाणिनिस्तु परमवैज्ञानिकतया स्पष्टं कृतवान्।

आचार्योऽत्यन्तसफलतया च अनुबन्धप्रक्रियां निर्वहति। अनुबन्धाश्च उदात्तादिस्वरज्ञाने अतीवोपयोगिनः सन्ति। एतत्प्रयोजनसाधने अन्ये वैयाकरणाः सर्वथा असफलाः अभूवन्। एका क्रिया द्व्यर्थकरी प्रसिद्धा। समाहितमना धर्मकीर्तिः चन्द्रगोमी च प्रत्ययेषु पाणिनिसम्मतान् अनुबन्धानेव स्वीकरोति। शर्ववर्मा च कातन्त्रव्याकरणे पदानुशासनस्य उपरि ध्यानं केन्द्रितं किरोति। येन कारणेन तत्कल्पित-तद्धित–प्रत्ययसंख्या अतीव नगण्या अस्ति। विपुलसंख्यायामपि वर्त्तमानानां तद्धितप्रत्ययानां केवलं त्रयोदशश्लोकेषु गणनां कृतवान्। वयमत्र महर्षिपाणिनि-कल्पिततद्धितप्रत्ययानुबन्धवैज्ञानिकतायाः प्रदर्शनप्रयासं कुर्मः। अनेन पर्यालोचनेन तद्धितप्रत्ययानां रूपसंरचनाप्रक्रिया सम्यगवगन्तुं शक्यते।

पाणिनिः तद्धितप्रत्ययेषु इ, उ, क्, ङ्, च्, ञ्, ट्, ड्, ण्, त्, न्, प्, ल्, ष्, स् भेदेन अनुबन्धानां संयोजनं कृतवान्। एतेषामनुबन्धानां प्रयोजनं प्रतिपादयितुं विधीयते–

**इ–**सः अनुबन्धः प्रत्ययस्य उच्चारणसौकर्याय प्रयुक्तो भवति। हलन्त–प्रत्ययस्वरूपानन्तरं यत् किञ्चिद् व्यञ्जनम् अनुबन्धत्वेन युज्यते। तस्य पूर्वस्य प्रयोगः प्रत्ययोच्चारणदृष्ट्या आवश्यको भवति। यथा– इमनिच् इत्यादयः।

**उ –** मतुप्[11] – अस्य प्रत्ययस्य अन्ते उबिति अनुबन्धस्य कृते प्रयुक्तो भवति। अतः प्रत्ययः 'उगित्' भवति तेन प्रथमद्वितीययोः सर्वनामस्थानविभक्तिषु च



उगित्प्रत्ययान्तात् शब्दात् नुमः (न्) आगमस्य विधानं भवति तेन 'गोमान्', गोमन्तौ, गोमन्तः, इत्यादिरूपाणि निष्पन्नानि भवन्ति। एवं चायं प्रत्ययः विभक्तेः पूर्वं नकारागमस्य सूचको भवति।

**क् –** अयमनुबन्धः प्रक्रियायां स्वरविधाने च द्विधा सहायको भवति। एतदनुबन्ध-युक्तः प्रत्ययविशिष्टप्रकृतेः आदिस्वरमुद्दिश्य यत्र वृद्धिः[12] स्यात् तत्रैव एतत् प्रत्ययनिष्पन्नरूपे अन्तोदात्तस्वरो भवति। यथा–आत्रेयः।

**ङ् –** एतदनुबन्धनिष्पन्नशब्दे स्त्रीलिङ्गबोधकस्य चाप् (आ) प्रत्ययस्य विधानं भवति। यथा– अजादस्यापत्यं स्त्री 'आजाद्या' इत्यादि।

**च् –** एतदनुबन्धस्य आसञ्जनेन प्रत्ययः 'चित्' भवति। चित्प्रत्ययनिष्पन्नपदे अन्तोदात्तः[13] स्वरो भवति। तथा चायमनुबन्धः स्वरार्थः सिध्यति। चित्स्वरश्च ञित्स्वरस्य बाधको भवति। यथा–कौञ्जायनाः इत्यादि।

**ञ् –** अयमनुबन्धः प्रकृते आदिस्वरस्य वृद्धिभावाय[14] अर्थात् ऐ अथवा औ इति वर्णयोः आगमो भवति एवं च तन्निष्पन्नरूपे अनुदात्तस्वरस्य विधानं च जायते। यथा – पौंस्न इत्यादि। 'ट्' इत्यनुबन्धविशिष्टप्रत्ययविधानेन यद्रूपं भवति तस्मात् स्त्रीलिङ्गे ङीप् (ई) विधानं भवति। अर्थात् इदं रूपं स्त्रीलिङ्गे ईकारान्तं जायते।

**ड् –** एतस्य अनुबन्धस्य संयोगेन प्रत्ययः डित् भवति। तत्र प्रकृतौ यदि अन्ते स्वरः व्यञ्जनं वा भवति तत्र टिभागस्य लोपसूचको भवति।

**ण् –** णकारानुबन्धः प्रकृतेरादिस्वरस्य वृद्धिं विधत्ते अर्थात् ऐ तथा औ इति आगमस्य द्योतको भवति। यथा– औपगवः इत्यादयः।

**त्[15] –** एतदनुबन्धनिष्पन्नरूपें स्वरितस्वरो भवति। यथा – 'क्व' इत्यादयः।

**न्[16] –** अयमनुबन्धः परिनिष्ठितरूपे आद्युदात्तस्वरं सूचयति।

**प् –** एतदनुबन्धविशिष्टप्रत्ययस्य प्रकृतिसंयोगद्वारा निष्पन्नं रूपमनुदात्तस्वरस्य सूचनां ददाति।

**ल् –** लकारानुबन्धयुक्तः प्रत्ययः लित् इति भवति तथा तस्य प्रत्ययस्य पूर्वस्वरस्य उदात्तो भवतीति सूचनां ददाति।

**ष्** – षकारानुबन्धसंयोगविशिष्टः प्रत्ययः तत्प्रत्ययनिष्पन्ने रूपे स्त्रीलिङ्गो ङीष् (ई) विधानस्यायं सूचनां ददाति।

**स्** – अयमनुबन्धः प्रकृतेः अन्तिमस्वरस्य लोपसूचकः तथा च अन्त्यस्वरः उकारो भवति चेत्तस्य गुणाभावस्य बोधको भवति। यथा– पार्श्वम् इत्यादि।

भाषाशास्त्रेऽपि एतान् तद्धितप्रत्ययानुबन्धान् आधारीकृत्य प्रयोजनस्य उल्लेख आवश्यकः। अत एवात्र प्रयोजनं समीक्ष्यते–अधिकतरानुबन्धाः ध्वनिपरिवर्तनं सूचयन्ति, तत्रापि केचनानुबन्धाः उदात्तादिस्वरान् अवबोधयन्ति। अल्पीयांसः अनुबन्धाः उभयार्थकाः भवन्ति। ईकारानुबन्धस्तु उच्चारणार्थकः एव। एवञ्च यः अनुबन्धः प्रयोजनान्तरं सूचयति, तदनुबन्धविशिष्टप्रत्ययोच्चारणेन प्रत्ययस्वरूपेण वा सुस्पष्टं भवति। तथा च प्रयोजनान्तसूचनां वयं सरलतया समुपलभामहे। तद्यथा– यस्मिन् तद्धितप्रत्यये णकारः ञकारो वाऽनुबन्धः आसज्यते तत्र वृद्धिर्भवति, एतद्विषये अपरसंबन्धिनम् उपस्थापयति। तथा चायमनुबन्धः स्वप्रवृत्तौ सफलो भवति।

एवमेव पाणिनिविहिताः तद्धिता यथा नूतनप्रातिपदिकनिर्माणे समर्थाः तथा तत्तत्प्रातिपदिकानामर्थनिश्चये छान्दसप्रयोगप्रसङ्गे तेषां स्वरादिनिर्धारणे च निमित्तानि भवन्तीति विशिष्टताम् आरोहन्ति।

❖



## सन्दर्भाः

1. तद्धिताः 4.1.47 आपञ्चमसमाप्तेरधिकारोऽयम्। सि.कौ.
(ख) 'स्वार्थेन परिपूर्णं पदं पदार्थान्तरेण उपसंक्रमते' इति न्यायात् सुबन्तात् तद्धितोत्पत्तिः।
2. तिङश्च 5.3.74 तिङन्तादतिशये द्योत्ये तमप् स्यात्। सि.कौ.
3. कुत्सिते 5.3.74
4. कृत्तद्धितसमासाश्च 1.2.46 कृत्तद्धितान्तौ समासाश्च प्रातिपदिकसंज्ञाः स्युः। सि.कौ.
5. पुरोडाशसहचरितो मन्त्रः पुरोडाशः। स एव पौरोडाशः। स्वार्थेऽण्। (पौरोडाशपुरोडाशात् ष्ठन् 4.3.70)
6. तस्यापत्यम् 4.1.92 इत्यनेन षष्ठ्यन्तात् इत्यण् विधीयते, षष्ठी च षष्ठी शेषे 2.3.50 इत्यनेन कारकप्रातिपदिकार्थव्यतिरिक्ते स्वस्वामिभावादिसम्बन्धे भवति। सि.कौ.
7. तेन रक्तं रागात् 4.2.1
8. ठस्येकः 7.3.50 किमिदं ठादेशे वर्णग्रहणं संघातग्रहणं वा? विशिष्टस्य अस्य ग्रहणं कर्त्तव्यम्। व्युत्पाद्यन्ते तदापि न दोषः। महाभाष्यम् 7.3.50
9. शब्दस्वरूपे यत्र अर्थस्य अतिदेशः क्रियते असौ अर्थातिदेशनाम्ना कीर्त्यते बुधैः। प्रत्ययलोपे प्रत्ययलक्षणम्। ल.शे.
10. तद्राजस्य बहुषु तेनैव स्त्रियाम् 2.4.62 इह बहुष्वित्यनेन जसादिबहुवचनं गृह्यते? अर्थो वा। पदमञ्जरी
11. तदस्यास्त्यस्मिन्निति मतुप् 5.2.94
12. किति च 7.2.118 किति तद्धिते च तथा। सि.कौ.
13. चितः 6.1.136 अन्त उदातः चितः सप्रकृतेर्बहुलार्थम्। सि.कौ.
14. तद्धितेष्वचामादेः (7.2.117) सि.कौ.
15. तित्स्वरितम् 6.1.185
16. ञ्नित्यादेर्नित्यम् 6.1.197 ञिदन्तस्य निदन्तस्य आदिरुदात्तः। सि.कौ.

❖

# किञ्चित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र–तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।
अ0 = अष्टाध्यायी। वा0 = वार्तिकम्

आक्रोशः — आक्रोशः शपनम्
का. आक्रोशेऽवन्योर्ग्रहः 3.3.45
का. आक्रोशे नञ्यनिः 3.3.112

वर्षप्रतिबन्धः — प्राप्तकालस्य वर्षस्य कुतश्चित् निमित्तादभावो वर्षप्रतिबन्धः
का. अवे ग्रहो वर्षप्रतिबन्धे 3.3.51

रश्मिः — रथादियुक्तानाम् अश्वादीनां संयमानार्था रज्जू रश्मिरिह गृह्यते
का. रश्मौ च 3.3.53

अवज्ञानम् — अवज्ञानम् असत्कारः
का. परौ भुवोऽवज्ञाने 3.3.55

निपानम् — निपिबन्ति अस्मिन्निति निपानम् उदकाधार उच्यते। आहावः पशूनाम्। कूपोपसरेषु च उदकाधारस्तत्र हि पानाय पशव आहूयन्ते।
का. निपानमाहावः 3.3.74

मूर्तिः — मूर्तिः काठिन्यम्
का. मूर्तौ घनः 3.3.77

निमितम् — समन्तात् मितं निमितम्। समारोहपरिणाहम्।
का. निघो निमितम् 3.3.87

पर्यायः — पर्यायः परिपाटी, क्रमः
अर्हः — अर्हणम् अर्हः योग्यता
ऋणम् — ऋणं तद् यत् परस्य धार्यते
उत्पत्तिः — उत्पत्तिः जन्म
का. पर्यायार्हर्णोत्पत्तिषु ण्वुच् 3.3.111

सुखम् — सुखं मानसी प्रीतिः
का. कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम् 3.3.116



# विशिष्टाद्वैतवेदान्ते ब्रह्मविचारः

डॉ. दीपक कुमारः

'सविशेषाद्वैतम्' इत्यस्यैवापरपर्यायो विशिष्टाद्वैतमिति। सविशेषाद्वैतम् इत्यत्र सविशेषमद्वैतम्। अद्वैतपदं च धर्म-धर्मि इति उभयपरं भवत्येव। अतः सविशेषाद्वैतम् इति अस्य विशेषत्रयविशिष्टम् एकमेव तत्त्वमिति निष्कर्षः।

द्वाभ्याम् इतं द्वीतम्, प्रकारद्वयवत्तया ज्ञातं भिन्नं तदेव द्वैतम्–एकम् इत्यर्थः च लभ्यते। यदा न विद्यते द्वैतं भेदो यस्मिन् इति अद्वैतम्, भेदरहितम् एकमिति। द्वयोः भावो द्विता – सैव द्वैतं, न द्वैतम् अद्वैतम् अभेदः इति चाभेदपरः अद्वैतशब्दः। श्रीभाष्यकारः स्वीयग्रन्थेषु निर्विशेषं वा सविशेषं वा ब्रह्म इत्येव बहुशो विकल्प्य सविशेषपरतां प्रतिष्ठापयति।

एकमेव तत्त्वं तच्च निर्विशेषमेव सजातीय–विजातीय–स्वगतभेदरहितमिति परे। सिद्धान्तानुसारं तु सर्वदा चिदचिदविशिष्टमेव ब्रह्म कल्याणगुणाकरश्चेति विशिष्टं सविशेषं ब्रह्मैव तात्पर्यम्।

श्रीभगवद्रामानुजाचार्यैः प्रवर्तितं दर्शनं विशिष्टाद्वैतम्। न द्वैतमद्वैतमभेद इत्यर्थः। विशिष्टस्याद्वैतं विशिष्टाद्वैतम्। वैशिष्ट्यं च चिदचिदोः इति व्युत्पत्त्यनुसारेण विशिष्टाद्वैतशब्दः चिदचिद्विशिष्टमद्वैतं तत्त्वं भगवन्तं नारायणमेव वेदान्तवेद्यमभिधत्ते।

वेदानाम् अन्तिमो भाग इति व्युत्पत्त्या यद्यपि वेदान्तशब्दो वेदशाखानामन्तिमभागेषु विद्यमानासु उपनिषत्सु एव साक्षात्सङ्गता तथापि उपनिषद्वाक्यानां संक्षिप्ततम–व्याख्यानभूतेषु शारीरकसूत्रेषु वेदान्तोपबृंहणरूपेषु स्मृति–इतिहास–पुराणेषु तैस्तैः आचार्यैः वेदान्तव्याख्यारूपेण उपस्थापितेषु भाष्यादिष्वपि गौण्या वृत्त्या प्रयुज्यते वेदान्तशब्दः।

विशिष्टाद्वैतवेदान्तानुसारं सजातीयजीवभेदे विजातीयाचिद्भेदः स्वगतकल्याणगुण-

रूपभेदश्च एतद् भेदत्रयं विशिष्टं ब्रह्मैव। माण्डूक्योपनिषदि 'शान्तं शिवमद्वैतं चतुर्थं मन्यन्ते' इति श्रूयते। अत्र रामानुजभाष्ये सजातीयविजातीयरहितमिति व्याख्यानं तु जगत्कारणत्वेन सजातीयवस्तु निषेधपरम्, चेतनानां परमात्मना साजात्यं तु ज्ञानानन्दस्वरूपत्वेन एव इति बोध्यम्। भेदपदं पदार्थविशेषवाचि, न तु अन्योन्याभावपरम्। अतः त्रिविधभेदः पारमार्थिक एव। द्रव्ये गुणानामिव चिदचिदोरपि परमात्मा पृथक्सिद्धः एव। भक्तिसिद्धान्तानुगुणतया परमात्मनः अप्राकृतविग्रहयोगं श्रुतिस्मृतिसूत्राद्यनुसारेण अनुभवानुरोधेन च निरधारयत् श्रीभाष्यकारः।

वस्तुतः कल्याणगुणोपेतो नित्यज्ञानवान् ईश्वरस्यैव नामान्तरं ब्रह्मापि। चित् जीवः, अचित् संसारः इति आभ्यां सह शरीरशरीरिभावो ब्रह्मणः। एतद्विशिष्टस्य ब्रह्मणोऽद्वितीयत्वम्। एतेन जीवस्य संसारस्य च ब्रह्मणो व्यतिरिक्तत्वं सत्यत्वं च व्यक्तीभवति।

चिदचिदविशिष्टमद्वैतं मन्यमानाः उक्तां श्रुतिमन्यार्थपरतामुन्नीय विशिष्टाद्वैतिनः स्वमतं प्रमाणयन्ति। अत्र श्रुतौ अद्वितीयपदेन न द्वितीयसामान्याभावो विवक्षितः किन्तु सजातीयद्वितीयाभावः प्रकृते तत्पदेन बुबोधयिषितः। यथाऽस्मिन् ग्रामे नगरे वा अयमद्वितीयः पुरुषः। नैवंविधेन वाक्येन अस्मिन् ग्रामे नगरे वा अन्यः कोऽपि द्वितीयः पुरुषो नास्ति इत्यर्थं प्रतिपित्सितम् अवगच्छति प्रतिपत्ता अपितु विद्यया वपुषा धनेन वा समानो नान्यः कश्चित् इति ततो जानाति। तथैव अत्रापि वेदवाक्येन विवक्षितम्। नैतत्सजातीयमन्यत् किमप्यस्तीति अद्वितीयत्वमेतस्य अन्यथा उपपद्यमानं प्रपञ्चस्य काल्पनिकत्वमवगमयति। 'नेह नानास्ति किञ्चन' इत्यनेन न जगति नानात्वं भेदः प्रतिषिध्यते। किञ्च इह ब्रह्मणि नानात्वं प्रतिषेधविषयः। ब्रह्म नाना नास्ति इति तात्पर्यम्।

तदिदमपि यथार्थमेव यत् सर्वेषां लक्ष्यमेकमेव साधनानि नानाविधानि। लोकेऽपि गन्तव्यस्य एकत्वेपि साधनानि बहुविधानि भवन्ति। कश्चिद् वायुयानेन कश्चिद् जलयानेन कश्चिद् रेलयानेन कश्चिद् पदाभ्यामन्यथा वा जिगमिषन्ति। नैतावता लक्ष्यं भिद्यते। तथैव नित्यसुखावाप्तिः, आत्यन्तिकदुःखनिवृत्तिर्वा अभिमता सर्वैः विविधैरुपायैः प्राप्तव्या इति नाचार्याणां परस्परं वैमत्यम्।

परमिदमपि एकमालोचनीयमस्ति। श्रद्धा विश्वासो वा सन्दिग्धे वस्तुनि न



जायते।। निश्चितेऽर्थे श्रद्धा उत्पद्यते। वैदिकानुष्ठनानि ध्यानादीनि च सर्वाणि निश्चितान्येव श्रद्धोत्पादनद्वाराऽनुष्ठितानि सफलानि भवितुमर्हन्ति अन्यथाऽनुष्ठितेभ्यः अश्रद्धया हुतं दत्तमित्यादिना बहुशः प्रतिषेधात्। श्रद्धयैवानुष्ठितो विधिः सफलीभवति इति विस्तरभयात्र प्रतन्यते तथा च वैदिकवाक्येषु नानार्थत्वं नेष्यते। अतएव "न जातहार्देन न विद्विषादरः" इति किरातार्जुनीयपद्यं व्याख्यातुकामो मल्लिनाथो विद्विषादरोभयं पक्षे आदरः इत्येवं व्याख्याय पुंवाक्यतया न दोषः इत्युक्तवान् अर्थात् पुंवाक्यतया पौरुषेयवाक्यतया श्लेषेण उभयविधार्थकथनं न दोषाय। अपौरुषेये वाक्ये द्विधा व्याख्यानं न युज्यत इत्यभिप्रायः तथा च व्याख्यानभेदः श्रुतीनां नौचितीमर्हति तथापि 'क इत्था वेद' इत्यादिना इत्थंरूपता प्रतिपादयितुमशक्या ब्रह्मणः इति बोधनात्, "मायाभिः पुरूरूप ईयते" इत्यादिना बहुरूपतया प्रतिपादनात्। विभिन्नरूपतायाः अस्य सम्भवेन कस्याप्याचार्यस्य मतं न विमतम्।

अचिन्त्यापरिमेयशक्तिसमन्वितो निरस्तसमस्तदोषो निरवधिककल्याणगुणगणाञ्चितः पुरुषोत्तमो नारायणः परमेश्वरः ब्रह्मापरनामधेयः विश्वप्रपञ्चस्य निर्माता नियन्ता च। चित् जीवः, अचित् प्रपञ्चः एतद् उभयं ब्रह्मणः शरीरम् तथा च उक्तम् 'यः पृथिव्यां तिष्ठत पृथिव्या अन्तरोऽयं पृथिवी न वेद, यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति' एवं 'यमात्मा न वेद यस्यात्मा शरीरम्' इत्यादि बृहदारण्यके। जीवो ब्रह्मणोंऽशः अग्नेः स्फुलिङ्गवत् अल्पज्ञः अणुस्वरूपश्च। माया ब्रह्मशक्तिरतो ब्रह्माश्रिता। अविद्या ज्ञानाभावरूपा जीवनमाश्रयते। अतो जीवोऽल्पज्ञः न ब्रह्म। ज्ञाज्ञौ द्वौ अजावनीशौ इत्यादिश्रुतेः द्वयोर्भेदः प्रमाणसिद्धः।

ईश्वरः 'अखिलहेयप्रत्यनीकान्तज्ञानानन्दैकस्वरूपः, ज्ञानशक्त्यादिकल्याणगुणगणविभूषितः, सकलजगत्सर्गसंस्थितसंहारकर्त्ता 'आर्तो जिज्ञासुरर्थार्थी ज्ञानी' त्युक्तचतुर्विधफलप्रदः, विग्रहयुक्तः, लक्ष्मीभूमिनीलानायकश्च।[1]

एतदुक्तं भवति-जीवात्मा तु ब्रह्मणः शरीरतया प्रकारत्वात् ब्रह्मात्मकः, यस्यात्मा शरीरमिति श्रुत्यन्तरात्। एवम्भूतस्य जीवस्य शरीरतया प्रकारभूतानि देवमनुष्यसंस्थानानि वस्तूनि इति ब्रह्मात्मकानि तानि सर्वाणि, अतो देवो मनुष्यो यक्षो राक्षसः पशुर्मृगः पक्षी वृक्षो लता शिला पटः घट इत्यादयः सर्वे प्रकृतिप्रत्यययोगेनाभिधायकतया प्रसिद्धाः शब्दाः लोके तत्तद्वाच्यतया प्रतीयमानतत्तत्संस्थानवस्तुमुखेन तदभिमानिजीवत-

दन्तर्यामिपरमात्मपर्यन्तस्य संघातस्यैव वाचका[2] इति। श्रीरामानुजाचार्याः अन्यत्रापि प्राहुः 'तस्यैव' (जगदात्मनो ब्रह्मणः) च वैभवप्रतिपादनपराः श्रुतयः स्वेतरसमस्तचिदचिद्वस्तुजातान्तरात्मतया निखिलनियमनं तच्छक्तिदंश-तद्विभूति-तद्रूप-तच्छरीर-तत्तनुप्रभृतिभिः शब्दैः तत्सामानाधिकरण्येन च प्रतिपादयन्ति'[3] इति।

ब्रह्मसूत्रस्य 'अथातो ब्रह्मजिज्ञासा'[4] इति अस्मिन् आदिमे सूत्रे ब्रह्मपदं विवेचयता श्रीभाष्यकारेण रामानुजाचार्येण भाषितम्–ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते। सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः। बृहत्त्वञ्च स्वरूपेण गुणैश्च यत्रानवधिकातिशयं सोऽस्य मुख्यार्थः। स च सर्वेश्वर एव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकः, अनेकार्थकल्पनायोगात् भगवच्छब्दवत्। तापत्रयातुरैः अमृतत्वाय स एव जिज्ञास्यः अतः सर्वेश्वर एव जिज्ञासाकर्मभूतं ब्रह्म[5] इति।

अस्य कर्मभूतस्य ब्रह्मणः स्वरूपस्वभावादिविषये निर्गुणत्वसगुणत्वादिविषयकं वादिविवादमपाकुर्वता श्रीरामानुजाचार्येण उद्घोषितं यत् ब्रह्मशब्दवाच्यस्य पुरुषोत्तमस्यायं स्वभावः सर्वैः प्राकृतिकैर्दोषरहितः सर्वेषां दिव्यानां कल्याणगुणानामाश्रयश्च विद्यते 'निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम्',[6] निर्गुणं निर्विकारम्'[7] इत्यादीनि औपनिषदवचांसि ब्रह्मणो हेयगुणराहित्यमेव प्रतिपादयन्ति, न तु सर्वथा गुणराहित्यम्, सर्वविशेषणविरहितस्य वस्तुनो लौकिकवैदिकपराहतत्वात्। न हि सर्वथा धर्मरहितं वस्तु प्रत्यक्षानुमानप्रमाणयोर्विषयो भवितुर्महति, तयोरुभयोरेव प्रमाणयोः सविशेषविषयकत्वात्। न च तथाविधे वस्तुनि शब्दोऽपि प्रवर्तते। यतो हि प्रकृतिप्रत्ययार्थभेदबोधनकृतं पदत्वम् अनेकपदार्थसंसर्गविशेषबोधनकृतं वाक्यत्वम्। तथाविधपदवाक्यस्वरूपतालब्धप्रमाणभावस्य शब्दस्य निर्विशेषवस्तुबोधनसामर्थ्यान्न निर्विशेषवस्तुनि शब्दः प्रमाणभावमश्नुते। न च निर्विशेषशब्द एव तथाविधे वस्तुनि प्रमाणमिति वाच्यं, तस्यापि शब्दस्य केनचिद्विशेषेण विशिष्टतयाऽवगतस्य वस्तुनः कतिपयविशेषविरहितरूपेण स्वार्थबोधकत्वात्। अतएव निर्गुणमपि श्रौतं पदं ब्रह्मणि प्राकृतगुणविरहमेव साधयति। निर्गुणपदस्यास्यैवार्थस्य स्वीकारे 'यः सर्वज्ञः सर्ववित्'[8] इत्यादीनामपि सगुणश्रुतीनां स्वारस्यनिर्वाहस्संभवति।

आरोपापवादन्यायस्य समानाश्रयविषयनियमत्वात्, सगुणनिर्गुणश्रुतीनां



भिन्नविषयत्वाच्च। निर्गुणश्रुतीनां हि विषयो ब्रह्मणि प्राकृतगुणानां निषेधः सगुणश्रुतीनां विषयश्च ब्रह्मणि दिव्यानां कल्याणगुणानां समर्थम्।

ब्रह्मणः अनयोरुभयोः गुणयोः स्वाभाविकत्वं प्रतिपादयन्तः श्रीरामानुजाचार्याः प्राहुः 'ब्रह्मशब्देन च स्वभावतो निरस्तनिखिलदोषोऽनवधिकातिशयासङ्ख्येयकल्याणगुणगणः पुरुषोत्तमोऽभिधीयते'[9] इति। पुरुषेभ्यः उत्तम इति हि पुरुषोत्तमशब्दस्य व्युत्पत्तिः। उत्तमत्वञ्च प्रशासनकर्तृत्वमेव। किञ्च 'बृहि वृद्धौ'[10] अथवा बृंहति वर्धते इत्यर्थको ब्रह्मशब्दो व्युत्पद्यते। स्वेतरसमस्तवस्तुवृद्धिकारके ब्रह्मशब्दः साक्षात्सङ्गच्छते। श्रुतिरपि निर्व्यनक्ति ब्रह्मशब्दम्–'बृहति बृंहयति तस्मादुच्यते परं ब्रह्म'[11] इति वाक्येन। 'ब्रह्म परिवृढं सर्वतः'[12] इति वक्ति यास्कोऽपि ब्रह्मशब्दार्थम्। अतएव रामानुजाचार्याः श्रीभाष्ये प्राहुः 'सर्वत्र बृहत्त्वगुणयोगेन हि ब्रह्मशब्दः बृहत्त्वञ्च स्वरूपेण गुणैश्च। स च सर्वेश्वर एव। अतो ब्रह्मशब्दस्तत्रैव मुख्यवृत्तः। तस्मादन्यत्र तद्गुणलेशयोगादौपचारिकाः, अनेकार्षकल्पनायोगात् भगवच्छब्दवत्।[13] अशयोऽयं यत् बृहत्त्वं नामोत्कर्षः। अयमुत्कर्षो ब्रह्मणि द्विधा वर्तते–स्वरूपगतः गुणगतश्च। तत्राथर्वशिरश्श्रुतिः 'बृहति' इति पदेन स्वरूपगतं बृहत्त्वं, 'बृंहयति' इति पदेन च गुणगतं बृहत्त्वमाविष्करोति। उभयप्रकारमिदं निरपेक्षं बृहत्त्वं वस्तुतः तु सर्वश्वर एवं भवितुमर्हति। अतएव, सर्वेश्वर एव ब्रह्मशब्दवाच्यः। इत्थं पुरुषोत्तम-सर्वेश्वर–परमात्म–ब्रह्मप्रभृतयः शब्दाः समानार्थका इति सिद्धोऽर्थः।

'सर्वेश्वर' इति शब्दस्य सर्वेषामीश्वर इत्यर्थो भवति। सर्वेश्वरपदघटकीभूत ईश्वरशब्दश्च व्युत्पद्यते 'अशु व्याप्तौ' इति धातोः सर्वव्यापकत्वरूपेऽर्थे सिद्ध्यति। ईश्वरस्य सर्वव्यापकतां वेदवचांसि प्रकारद्वयेन प्रतिपादयन्ति–आभ्यन्तरव्याप्तिमुखेन बाह्यव्याप्तिमुखेन च। 'अणोरणीयान्',[14] आत्मा नारायणः परः',[15] 'ईशावास्यमिदं सर्वम्'[16] इत्यादिकाः श्रुतयः, 'ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति'[17] 'अहमात्मा गुडाकेश सर्वभूताशयस्थितः'[18] इत्यादीनि स्मृतिवचांसि चान्तर्व्याप्तिनिरूपणमुखेन ब्रह्मणो जगदात्मत्वमपि प्रतिपादयन्ति।

'महतो महीयान्'[19], 'स भूमिं सर्वतः . . .अत्यतिष्ठद्दशाङ्गुलम्'[20] 'अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः'[21] इत्यादीनि वचांसि तस्य स्वेतरवस्तुनो बहिर्व्याप्तिं वदन्ति। सर्वेश्वरस्य जगच्छरीरकत्वम् अनुगृहीतं श्रीमद्रामानुजाचार्यैः वेदार्थसंग्रहे।

भगवान् एव एकलस्य जगतः सृष्ट्यादिकर्त्ताऽस्तीति निरूपितं श्रुत्या। 'यतो

वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति, यत् प्रयन्त्यभिसंविशान्ति'[22], 'ब्रह्म वा इदमग्र आसीत्'[23] 'एको ह वै नारायणः आसीत्'[24] इत्यादिभिर्वाक्यैः ब्रह्मशब्दवाच्यस्य नारायणस्य निमित्तोपादानकारणद्वयत्वं प्रतिपादितमस्ति। इदमिति श्रीभाष्यकाराणां ब्रह्मशब्दविवेचनम्।

❖

**सन्दर्भाः**


1. तत्त्वत्रयम् 3/1
2. वेणीसंहारः पृ. 30
3. तत्रैव, पृ. 11
4. शारीरकमीमांसा 1.1.1
5. तत्रैव 1.1.1
6. श्वेताश्वतरोपनिषद् 6.19
7. तत्रैव
8. मुण्डकोपनिषद् 1.1.10
9. शारीरकमीमांसा 1.1.10
10. धातुपाठ :
11. अथर्वशिरः
12. निरुक्तम् 1.8
13. शारीरकमीमांसा (श्रीभाष्यम्)
14. मुण्डकोपनिषद् 3
15. तै. नारा.
16. ईशावास्योपनिषद् 1
17. भ.गी. 15.15
18. तत्रैव 10.20
19. मुण्डकोपनिषद्
20. पु.सू. 1
21. तै. मा. 5
22. तै. उ. भृ. सं. 1
23. बृ. उ. 1.4.1
24. ऐतरेयोप. 1.1


❖



# चम्पूभारतस्य परिशीलनम्


**डॉ. पूर्णचन्द्र उपाध्यायः**


अतिविचित्रपरम्परावाहिन्यस्मिन्जगत्यलौकिकप्रतिभावतः क्रान्तद्रष्टुः कवेः सहृदयहृदयाह्लादकारि यत्कर्म काव्यमिताख्यां संज्ञामादधाति, तत्तु 'दृश्यश्रव्यत्व–भेदेन पुनः काव्यं द्विधा मत'मिति[1] विश्वानाथपरामर्शानुसारं दृश्यं श्रव्यञ्चेति द्विविधम्। तत्र पुनः "श्रव्यं श्रोतव्यमात्रं तत्पद्यगद्यमयं द्विधा"[2] इति कारिकानुगतं श्रव्यकाव्यस्य पद्यं गद्यञ्चेति यत्स्वरूपद्वयं, तदनयोर्भेदयोरुभयात्मकत्वमेव समेषां काव्यशास्त्रिणामेकाभिधानम्। उक्तं चात्र विश्वानथकविराजेन–

"गद्यपद्यमयं काव्यं चम्पूरित्यभिधीयते"[3] इति। अपि च "चम्पयति गमयति सहैव गद्यं च पद्यं चे ति चम्पूरिति पदस्यास्य निष्पत्तिः। पुनश्चापि "गद्यपद्योभयात्मकं काव्यं चमत्कृत्य पुनाति सामाजिकानिति चम्पूरिति नाम्ना कविभिरभिधीयते"[4] इत्युक्तं साहित्यदर्पणस्य लक्ष्मीटीकायाम्।

तदेवं लक्षणमिदमनुकुर्वच्चम्पूभारतमित्याख्यमनन्तभट्टकर्तृकं काव्यं नः परिशीलनीयमिति तद्विवेचयामः।

काव्यस्यास्य चम्पूभारतस्य कर्त्ता भट्टोपाह्वोऽनन्त इति निश्चीयते चम्पू–भारतस्य प्रत्येकस्तवकस्यान्ते "इत्यनन्तभट्टकविकृतौ चम्पूभारते" इत्युल्लेखात्।

महापुरुषाणां पदवीमनुकुर्वन्कविरसौ स्वदेशवंशादिविषये नितरां मौनावलम्बी-त्यन्तःसाक्ष्यस्य बाह्यसाक्ष्यस्य चाभावात्तद्गतं परिचयात्मकं वृत्तं याथातथ्येन निर्णेतुमशक्यम्। कालनिरूपणमप्यस्यानिश्चितात्मकम्। परम्परानुसारमसौ "भारत-चम्पूरि" त्याख्यस्य काव्यस्य कर्त्तुरभिनवकालिदासस्य प्रतिस्पर्धी आसीत्। तत्प्रतिस्पर्धायाः परिणामस्वरूपमेवानन्तभट्टेन "भागवतचम्पूः" "चम्पूभारतं" चेति चम्पूकाव्यद्वयं व्यरचि। अभिनवकालिदासस्य समयः 1050 ई. आसीदिति कृत्वाऽनन्तभट्टस्य कालः एकादशशताब्द्याः पूर्वार्धः निश्चीयते।

तदनेन विवरणेनानन्तभट्टस्य रचनाद्वयकर्तृकत्वमपि सिद्ध्यति, परन्तु भागवत-

चम्पूरितीयं कृतिरिदानीं दुर्लभा। अतस्तत्र चम्पूभारतमेवाद्वितीयकं कवित्व-प्रतिभायाः द्योतकमिति निश्चप्रचम्।

चम्पूकाव्यानां कथावस्तु रामायण–महाभारत–कथासाहित्य–पुराणादिभ्यः गृह्यते इति कविपरम्परानुसारमेव द्वादशस्तवकैर्गुम्फितस्य चम्पूभारतस्य कथानकं महाभारतस्योपजीव्यत्वं स्वीकुरुते। काव्येऽस्मिन् राज्ञः पाण्डोः साम्राज्यादारभ्य महाभारतयुद्धानन्तरं युधिष्ठिरस्य नृपत्वेऽश्वमेधं यावद् वृत्तं संक्षेपेण निबद्धम्। तदिदं कृतिरत्नं समुचितैः काव्यगतैस्तत्त्वैर्विभूषितं सत्सहृदयहृदयाह्लादकारीति तत्तत्काव्य-सौन्दर्यबोधकतत्त्वानां लक्ष्यानुगतपरिशीलनेन निश्चीयते।

**काव्यसौन्दर्यम्**–तत्र काव्यसौन्दर्यमित्युक्ते नैकस्य कस्यचित्तत्त्वस्यैव परिपुष्टत्वम्, अपि तु यथा लोके आपादमस्तकं सकलावयवानां यथोचिततविन्यासेन शरीरिणः सौन्दर्याधानमिति, तथैव काव्ये रसः, अलंकारः, गुणः, रीतिः, छन्दः, प्रकृति-चित्रणमित्यादीनामन्तस्तत्त्वानां बाह्यतत्त्वानां च परिपोषणेनैव काव्यसौन्दर्यत्वं निष्पद्यते।

**रसः**–तत्र विद्यमानेषु काव्यतत्त्वेष्वात्माभिमानस्य रसस्य प्राधान्येन विवक्षितत्वात् तस्यैव प्रथमं विश्लेषणं क्रियतेऽस्माभिरादावुपस्थितस्य त्यागान्मानाभावः इति न्यायात्, किं नाम रसस्य प्राधान्यमिति विचिकित्सायां तत्र प्राचीनैरर्वाचीनैश्चाचार्यैर्बहुधा चर्चितम्। तद्यथा "शब्दार्थौ शरीरं......रस आत्मा, रोमाणि छन्दांसि, अनुप्रासोपमादयश्च त्वामलङ्कुर्वन्ति" इति राजशेखरः।[5] "वाक्यं रसात्मकं काव्य" मिति विश्वनाथः।[6] "रसो वै सः" इति तैत्तिरीयोपनिषद्,[7] एवमेव रसप्राधान्ये महती चर्चा काव्यशास्त्रेषु। सोऽयं रसः नवधाऽऽचार्यमम्मटानुसारम्–"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः, बीभत्साद्भुतसंज्ञौ चेत्यष्टौ नाट्ये रसाः स्मृताः"[8] अपि च "शान्तोऽपि नवमो रसः"[9] इति।

प्रायशः सर्वेऽप्येते रसभेदाः चम्पूकाव्येऽस्मिन् साङ्गोपाङ्गतया सन्निवेशिताः सन्तः सहृदयहृदयानि मादयन्ति। तत्र हस्तिनापुरस्यालौकिकतायाः वर्णनेऽद्भुतरसस्य, मृगयाकाले व्याकुलितनेत्राणां हरिणानां चित्रणे पाण्डोः माद्र्याश्च रतिक्रीडायां संभोगशृङ्गारस्य, भीमसेनदुर्योधनयोः भ्रूविक्षेपे रौद्रस्य, मृगयावर्णने वीरस्य, किंदमस्याभिशापे भयानकस्य चेत्यादीनां रसानां निष्पत्तिरिति कविरसौ भट्टोऽनन्तो रसचित्रणे सिद्धहस्त इति सुप्रतीतिः।

**अलङ्कारः**–यद्यपि काव्यात्मरूपेण नास्य महत्त्वम्, तथापि शब्दार्थशरीरस्य बाह्यसौन्दर्यवर्धनपुरस्सरं रसादीनां पोषकत्वमिति कृत्वा तत्तत्काव्यतत्त्वेष्वस्याप्राधान्यमिति न। तदत्रानन्तभट्टस्य कविताकामिनीयमापादमस्तकं प्रत्यङ्गमनुप्रासादिभिः शब्दा-



लङ्कारैरुपमादिभिरर्थालङ्कारैश्च विभूषिता सती सामाजिकानामन्तःकरणानि नितरामानन्दयति। दिङ्मात्रमत्रोपस्थाप्यते उत्प्रेक्षाया निदर्शनमेकम्। तद्यथा–

**भूभुजोऽस्य सविधे विचरन्त्योर्भोजमद्रसुतयोर्दृशि शोभाम्।**
**जेतुकामामिव सर्वसमष्ट्या प्रादुरास पुरतो मृगयूथम्।।**[10]

**सम्भावनमथोत्प्रेक्षा प्रकृतस्य समेन यत्।**[11]

इति लक्षणसङ्गमनमत्र तु स्पष्टमेव विदुषाम्।

अपि चोपमायाः संयोजनेऽपि कवेरस्य नैपुण्यं सुप्रशस्यमिति निम्नाङ्कितात्पद्यात् ज्ञायते–

**प्रजाधिपोऽसौ प्रथमं युधिष्ठिरे सुतेषु तेजस्विषु तेषु पञ्चसु।**
**प्रभाकरे पञ्चतपा इवोन्नते प्रपातयामास विलोचनद्वयम्।।**[12]

"साधर्म्यमुपमा भेदे"[13] इति लक्षणानुगतं पद्येऽत्र पञ्चतपसो दृष्ट्या साकं पाण्डोः दृष्टिपातस्यौपम्यं निसर्गत्वमावहति। एवमेव एतद्व्यतिरिक्तानामनुप्रासयमक-श्लेष–रूपक–काव्यलिङ्गानामलंकाराणामत्र काव्ये प्राधान्येन संयोजनमिति तथ्यं विमर्शनेन ज्ञायते।

**गुणः**–यथा लोके आत्मनः नित्यौत्कर्ष्यं साधयन्तः शौर्यादयः गुणशब्दवाच्याः तथैव काव्ये माधुर्यादयः गुणाः अङ्गित्वमाप्तस्य रसस्योपकारकाः नियतधर्माश्च।[14] चम्पूभारतेऽस्मिन्नपि माधुर्योजःप्रसादाख्यास्त्रयोऽपि गुणाः काव्यात्मानं रसं परिपोषयन्तीति कवेः पाण्डित्यं द्योतते।

**रीतिः**–"पदसंघटना रीतिरङ्गसंस्थाविशेषवत्"[15] रति विश्वानाथकृतलक्षणानुसारं विशिष्टा भणितिभङ्गी पदसंघटना वा या खलु कविप्रतिभाजन्या गुणाश्रया सती रसमभिव्यञ्जन्ती रीतिरिति संज्ञा, सेयं रीतिः वैदर्भी, गौडी, पाञ्चाली, लाटिका चेति चतुर्धैव सर्वसम्मता। तदिदं चम्पूभारतं चतसृभिरेव रीतिभिः यद्यपि संघटितम्, तथापि वैदर्भीरीतेरत्र प्राधान्येनैवावस्थितिः।

**छन्दः**–पद्यकाव्यस्य सौन्दर्याभिव्यञ्जकत्वेऽन्यतमं हेतुभूतं यच्छन्दः, तद् वेदाङ्गत्वेन प्रख्यातमिति विदुषां विदितचरमेव। चम्पूभारतेऽस्मिन् पद्यानि वंशस्थम्, अनुष्टुप्, उपजातिः, इन्द्रवज्रा, सुन्दरी, पुष्पिताग्रा, मालभारिणीत्यादिभिः छन्दोभिः निबद्धानि सन्ति।

**प्रकृतिचित्रणम्**–कविनाऽनन्तभट्टेन काव्येऽस्मिन् चम्पूभारते प्रकृतेरपूर्वं रामणीयकं च चित्रमङ्कितम्। काव्येऽस्मिन् प्रकृतेः मानवीकरणमपि कवेः प्रकृतिप्रेमित्वं द्योतयति। इदं सर्वं कवेः वर्णनशक्तिं कल्पनावैभवं चावलम्ब्यैव प्रकृतम्। तत्र काव्यस्यास्य

मङ्गलाचरणे एव सरस्वत्याः हंसं शरदर्त्तोः चन्द्रमसा सह, नेत्रद्वितयं नीलकमलाभ्यां सह, मुखं च कमलेन साकं तुलयित्वा कविना स्वप्रकृतिवादित्वं प्रकटीकृतम्, हस्तिनापुरस्य समृद्धिवर्णनमपि प्रकृतेः सजीवत्वं मनोरमत्वं च प्रतिपादयति, तद्यथा-

**यस्यामुदग्रनृपमन्दिरचन्द्रशालावातायने गतिवशाद् वपुषि प्रशस्ताम्।**
**दीपाग्रधूप-मषिकां शिशिरांशुबिम्बे महोत्कुरङ्ग इति मुग्धजना वदन्ति।।**[16]

काव्येऽस्मिन् राज्ञः पाण्डोः मृगयावर्णने तु गद्यांशेषु एव प्रकृतेरनुपमं चित्रणं ननु दर्शनीयमेव, तदेवं काव्यादस्मात् कवेः प्रकृतिप्रेमित्वं व्यज्यते।

**भाषायाः संयोजनम्–**काव्येऽस्मिन् कवेः भाषायामपूर्वाधिकारिकत्वं प्रकट्यते। यथाऽनेन दीर्घसमासानां, तथैव लघुसमासानामसमस्तपदानां वा प्रयोगः कृतः। भाषायामस्य व्याकरणगताः विशिष्टप्रयोगा अपि दृश्यन्ते। यथा–

पलितभावुकः, अमितपचः, उपेयुषः, रविकल्पश्चेत्यादयः शब्दाः कवेः पाण्डित्यं प्रकटीकुर्वन्ति। अपि च निलिम्पः, निशान्तः, भृङ्गारश्चेत्यादीनां शब्दानां नावीन्यमपि कवेः व्याकरणगतं पाण्डित्यं पुरस्कुर्वन्ति, कवेरस्य भाषा सरला, मञ्जुला, प्रवाहशीला, सार्था, सहृदहृदयाह्लादकारिणी चेति कवेः प्रातिभ्यम्।

तदेवं तत्तत्काव्यगततत्त्वानां परिशीलनेन नैश्चित्यमिदं यत् काव्यमिदं चम्पूभारतं काव्यशास्त्रिणां लक्षणानुगतं सत्कवेरनन्तभट्टस्यानीतरविशिष्टप्रातिभ्यप्रकाशकमिति शम्।

❖

## सन्दर्भाः


1. विश्वनाथसाहित्यदर्पणः 6.1
2. तत्रैव 6.313
3. तत्रैव 6.336
4. तत्रैव 467
5. राजशेखरः, काव्यमीमांसा पृ.13-14
6. विश्वनाथसाहित्यदर्पणः 1.5
7. तैत्तिरीयोप. 2.7
8. काव्यप्रकाशः 4.29
9. तत्रैव 4.41
10. चम्पूभारतम् 1.16
11. काव्यप्रकाशः 10.137
12. चम्पूभारतम् 1.153
13. का. प्र. 10.125
14. सा. द. 8.1
15. सा. द. 9.1
16. चम्पूभारतम् 1.3


❖



# रसदृष्ट्या कार्तवीर्योदयमहाकाव्यस्य समीक्षा


**तेजनाथपौडेलः**


नाट्यशास्त्रे "नहि रसादृते कश्चिदर्थः प्रवर्तते" [1]इत्युक्त्वा प्रथमसमुद्घोषपूर्वकं रसस्वरूपस्य तदनुभवप्रकारस्य च सर्वप्रथमं विवेचनम् आचार्येण भरतमुनिनैव कृतम्।

ततः परम् आनन्दवर्धनाचार्येण स्वकीये ध्वन्यालोकनामके ग्रन्थे अयमेव प्रतीयमानोऽर्थः काव्यस्यात्मत्वेन प्रतिपादितः। तद्यथा–

**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।।**[2]

विविधवाच्यवाचकरचनाप्रपञ्चचारुणः काव्यस्य स एवार्थः सारभूतः। तथा चादिकवेर्वाल्मीकेः निहतसहचरीकातरक्रौञ्चाक्रन्दजनितः शोक एव श्लोकतया परिणतः। शोको हि करुणस्यायिभावः। प्रतीयमानस्य चान्यभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणं प्राधान्यात्।[3]

करुणरसप्रधानेऽपि रामायणमहाकाव्ये शृङ्गारवीरहास्यरौद्रादीनां रसानां यथोचितस्थाने समुचितः सन्निवेशो वर्तते। अतः रामायणादारभ्य रसस्य काव्यतरङ्गिणी निरन्तरं प्रवहमाना अवर्तत। रसस्यास्मिन् प्रवाहे भासकालिदासभवभूतिमाघभारवि-श्रीहर्षादिभिराचार्यैः महाकविभिश्च निमज्जनमकारि। एतादृशेष्वेव महाकविषु नेपालाभिजनः सहृदयशिरोमणिः सुकृतिदत्तपन्तो विराजते। संस्कृतमहाकाव्यस्य परम्परायां संस्कृतसाहित्यस्य भाण्डागारे वा जयत्येतस्य "कार्तवीर्योदयम्" नामकं महाकाव्यम्। काव्यमिदं स्वगुणैः कालिदासमाघभारविश्रीहर्षप्रभृतिभिर्लब्धप्रतिष्ठैर्महाकविभिर्विरचितानां महाकाव्यानां पङ्क्तौ स्थापनीयम्। महाकाव्यमिदमतीतकाले संस्कृतवाङ्मयविकासदिशि नेपालराष्ट्रेण कृतस्य कीर्तनीयस्यावदानस्य परिचायकं भारतवासिभिर्नेपालवासिभिश्च काव्यकलाकोविदैर्विपश्चिद्भिर्हृदयेन प्रशस्तम्, हृद्यमनवद्यञ्च भगवत्याः तारायाः समाराधनाय आविर्भूतं ग्रन्थरत्नमस्ति।

महाकाव्यमेतत् शास्त्रीयं वैदुष्यं सर्वविधकाव्यलक्षणाञ्चितां कलां च विवृणोति। महाकविस्सुकृतिदत्तः अनादिनिधनया देववाण्या महाकाव्यमेतद् विरचय्य सुदीर्घकालव्यापिनीं कीर्तिपताकां संस्कृतकाव्यनभसि ततान, नेपालदेशस्य संस्कृतसाहित्यस्य भाण्डागारं गरिमाणञ्च वर्धयामासेति नात्र शङ्कालेशः।

महाकविना सुकृतिदत्तपन्तेन पुराणेतिहासप्रसिद्धां कथामङ्गीकृत्य काव्यमिदं विरचितम्। सुकृतिदत्तः तन्त्रविद्योपासक आसीत्। तन्त्रसम्प्रदाये "पञ्चरात्रपद्धतिः" "कार्तवीर्योपासनापद्धतिः" इत्यादयः तन्त्रपद्धतयः प्रचलिताः सन्ति। पन्तवंशोद्भवेन तान्त्रिकसम्राजा प्रेमनिधिपन्तेन "कार्तवीर्यसपर्या" इत्याभिधानके पुस्तके कार्तवीर्य-सम्बन्धितन्त्रविद्यायाः विस्तरेण वर्णनं कृतमस्ति, अतस्तन्त्रविद्यासम्बन्धितत्वादनेन कविना पुराणादिषूपवर्णितः धीरोदात्तगुणान्वितः, सद्वंशः, सुक्षत्रियः, कार्तवीर्य एव काव्यनायकत्वेनावलम्बितः।

वाल्मीकीयरामायणे, हरिवंशपुराणे, पद्मपुराणे, मार्कण्डेयपुराणे, महाभारते, श्रीमद्भागवतादिपुराणेषु अन्येषु ग्रन्थेषु च कार्तवीर्योपाख्यानं भूरिशः प्राप्यते। श्रीमद्भागवतादिषु पुराणेषु तु कार्तवीर्यस्य हरेरंशावताररूपेण वर्णनं प्राप्यते। अन्यत्र कार्तवीर्यः विष्णोश्चक्रावताररूपेण विद्वद्भिः स्वीकृतः। यथा श्रीमद्भागवते–

**अर्जुनः कृतवीर्यस्य सप्तद्वीपेश्वरोऽभवत्।**
**दत्तात्रेयाद्धरेरंशात् प्राप्तयोगमहागुणः।।24।।**
**न नूनं कार्तवीर्यस्य गतिं यास्यन्ति पार्थिवाः।**
**यज्ञदानतपोयोगश्रुतवीर्यजयादिभिः।।25।।**(श्रीमद्भागवतम्–9.23/24-25)

सप्तदशसर्गेषु विभक्तेऽस्मिन् महाकाव्ये चतुश्चत्वारिंशदुत्तरसप्तदशशतमिताः (1744) श्लोकाः वर्तन्ते। अवाप्ताखिलभुवनैश्वर्यः परमधार्मिकः, प्रतापोज्ज्वलः, सद्वंशः, सुक्षत्रियः, पुराणप्रथितः कार्तवीर्योऽस्य महाकाव्यस्य नायकः, अखिलभूमण्डल-ललनाललामभूता शीलार्जवादिनिखिलललनोचितगुणग्रामगरिष्ठा उच्चवंशसमुत्पन्ना कनकप्रभा च नायिका वर्तते।

काव्यमिदं माहिष्मतीनगरवर्णनादारभ्यते। नगर्या अस्याः शासकः प्रबलप्रतापी कार्तवीर्यस्य पिता कृतवीर्यो बभूव। स अनपत्यतया खिन्नः कदाचित् स्वगुरोः दत्तात्रेयस्य आश्रमं जगाम। तस्याशीर्वादात् कार्तवीर्यं पुत्रमवाप। सर्वगुणसम्पन्नोऽयं पुत्रः वस्तुतः विष्णुरेवासीत्। लब्धसकलसंस्कारः विहितानेकबाललीलः कार्तवीर्यः यथाकालं सकलक्षत्रियोचितविद्यासम्भारं दधार। ततः सः तपस्तप्तुं जगाम।



इन्द्रकृद्विघ्नान्निरस्य संकल्पितं तपस्तप्त्वा कार्तवीर्यः पुनः माहिष्मतीमाजगाम। पिता कृतवीर्यः सकलगुणसम्पन्नं पुत्रं राज्यं समर्प्य सपत्नीकः वानप्रस्थमालम्बे।

विद्याबलवीर्ययौवनोद्भासितः कार्तवीर्यः कदाचित् विदर्भराजतनयायाः कनकप्रभायाः रूपगुणसम्पदं कर्णगोचरीचकार, लेभे च तस्याः स्वयंवरे सम्मिलितुमामन्त्रणम्। स्वयंवरे ससैन्यमुपगतं कार्तवीर्यं कनकप्रभा वरयामास।

ततः कविना उभयोः भोगविलासादिवर्णनं विधाय विस्तरेण कार्तवीर्यस्य धार्मिकता, राजशासनपरिपाटी, विद्वज्जनगुणग्रहिता च वर्णिता। रावणेन सह युद्धं कार्तवीर्यकृतो रावणपराजयः तद्दर्पभङ्गश्चेति व्याख्याय कविना काव्यान्ते कार्तवीर्यस्य वैराग्यं मोक्षोपलब्धिश्च वर्णिता। अन्तिमे सर्गे सुकृतिदत्तपन्तेन स्वस्य स्ववंशस्य च विस्तरेण परिचयमुपस्थाप्य काव्यं समाप्तिमुपनीतम्।

"रस्यते आस्वाद्यते इति रसः" इति व्युत्पत्त्यनुरूपं कार्तवीर्योदयमहाकाव्ये प्रायः नवानामेव रसानामभिव्यञ्जनसामग्रीसंयोजनचातुरी प्रदर्शितास्ति। यद्यपि वीरबीभत्सकरुणादिरसानां विशिष्या सामग्री महाकविनात्र समायोजिताऽस्ति, तथापि रसराजस्य शृङ्गाररस्य रसराजत्वमत्र प्रतिष्ठितम्। काव्यान्तःपातितं कनकप्रभाकार्तवीर्ययोः शृङ्गारवर्णनं वस्तुतः शृङ्गाररस्योत्कर्षाधायकरूपेण दरीदृश्यते। तदपि संयोगो विप्रलम्भश्चेति भेदद्वयमवाप्य महदाह्लादकत्वं जनयति। दशमसर्गगतं विप्रलम्भशृङ्गारवर्णनं, त्रयोदशसर्गे वर्णितं कार्तवीर्यकनकप्रभयोः सम्मेलनप्रसङ्गे संयोगशृङ्गारवर्णनमपि सर्वानन्यानतिशेते। शृङ्गारप्रधाने महाकाव्ये कनकप्रभाकार्तवीर्ययोः प्रेमवर्णनं मुख्यरूपेणाङ्गीकृतम्। एवमेव प्रथमतः नवमसर्गं यावद् रेवायाः, माहिष्मत्याः कृतवीर्यराज्यशासनस्य च वर्णनेषु शृङ्गाररसः तथा च प्रजायाः राजरतिरञ्जने भावध्वनिश्च सातिशयं राजते। तथा नवमसर्गः कनकप्रभायाः स्वयंवरोपक्रमे शृङ्गाररसस्यानुपमां छविं प्रस्तौति। एवमेकादशे सर्गे स्वयंवरस्थलवर्णनप्रसङ्गः, चतुर्दशसर्गे कार्तवीर्यकनकप्रभयोर्विवाहवर्णनप्रसङ्गः, पञ्चदशसर्गस्य नवदम्पत्योः सप्तद्वीपविहारवर्णनप्रसङ्गश्च रसराजशृङ्गाररस्य विशेषोद्बोधन-स्थलानि।

महाकाव्यस्याङ्गी रसः शृङ्गारः अतः सर्वत्रैवास्य रसस्य वर्णनं तु विद्योतत एव। महाकाव्येऽस्मिन् शृङ्गाररस्योत्कर्षाधायकानामन्येषां रसानामपि बहूनि वर्णनानि सन्ति। तत्र च वीररसः प्रधानतया ध्वन्यते। कार्तवीर्यसदृशस्य भगवतोंऽशावतारस्य महापुरुषचरितमाश्रित्य लिखितमहाकाव्यत्वात् महाकाव्येऽस्मिन् वीररसच्छटापि रसराजेन सह स्पर्धितया विराजते। चतुर्दशे सर्गे दशाननगर्वहरणावधौ वीररसपरिपाकः उदाहरणीयो

वर्तते, तद्यथा–

**सोऽयं काण्डविखण्डितारिधरणापालालिमुण्डोच्छलत्**
**प्राज्यास्त्रस्रुतिसिक्तसार्द्धसमरक्षोणीसुवाटीतटे।**
**क्षिप्रक्षिप्तकृपाणभिन्नगजराड्गण्डस्थमुक्तावली**
**बीजं कीर्तिलताप्रतापनतये काले वपत्योजसा।।**[4]

अत्र खलु अलंकारमाश्रित्य बलवीर्यपराक्रमयौवनादिभिरुद्भासितस्य कार्तवीर्यस्य वीरजनोचितं शौर्यपराक्रमान्वितं वर्णनं दृश्यते। तथैव–

**दीप्त्यात्मविस्तृतेर्हेतुरोजो वीररसस्थितिः।।**[5]

इत्याचार्यमम्मटस्य कथानानुसारं "चित्तस्य विस्ताररूपदीप्तत्वजनकमोजो" गुणो भवति एतल्लक्षणानुसारं विचार्यते चेन् महाकाव्ये प्रायः सर्वत्र वीररसवर्णनस्थलेषु दीप्तत्वजनकता एवावलोक्यते। एवमेव कृतवीर्यस्य कार्तवीर्यस्य च प्रतापातिशयवर्णने युद्धदानतपोदयादीनां वीररसभेदानां वर्णनमप्युलभ्यते। यथा युद्धवीरस्य–

**अतिदक्षविपक्षवक्षसां स्थलमुद्भेद्य कृपाणभाविता।**
**नृपकीर्तिलता दिवङ्गता सुषुवे चन्द्रसुमम्भकोरकैः।।**[6]

एवमेव दानवीरस्य–

**विबुधा न सुधाभिलाषिणः वसुधा नाकजयिष्णुसङ्गुणाः।**
**न बुधाश्च मुधागमस्पृहाः कृतवीर्ये सदकर्मसोत्सवे।।**[7]

एवमेव तपोवीरस्य–

**विधिरपि प्रसमीक्ष्य तपो महद् वरमयङ्कतमञ्च समर्हति।**
**इति निरन्तरचिन्तनयात्यजन् मुखचतुष्टयतः श्वसितावलीम्।।**[8]

उपर्युक्तेषु सर्वेषूदाहरणेषु एकोऽपि नृपः विविधस्थलेषु युद्धदानतपःपराक्रमादिवीरजनोचितं पृथक्पृथगाचरणं करोति इति श्लोकमाध्यमेनैव स्पष्टं भवति। अत एतान्यपि वीररसस्यैवोद्बोधनस्थलानि।

एवमेव महाकाव्येऽस्मिन् अङ्गभूतानामन्येषां रसानामपि प्रयोगः प्राप्यते। यथा- कनकप्रभायाः सौन्दर्यसविध आत्मानं तुच्छं मत्वा नृपाः विविधशाखासु पलायाञ्चक्रिरे इत्यत्र भयस्थायिभावो भयानकरसः नितरामास्वादपदवीमारोहति। तद्यथा–

**कुलशीलवपुर्वयोगुणैरनवद्यैः कनकप्रभोचितम्।**
**प्रविलोक्य जहुः स्वयंवरव्रतमाशालतिकान्विता नृपाः।।**[9]

एवमेव बीभत्सरसोपस्थितिः यथा–



**कोदण्डोद्गतचण्डकाण्डदलितप्रत्यर्थिमुण्डावली**
**भ्राजताण्डवपण्डिते नृपतावस्मिन्सदा गच्छति।**
**युद्धक्षोण्यजिरङ्गरालकुटिलव्यावृत्तपिङ्गेक्षणा**
**स्फीतासृङ्मदपाननिर्भररसा सम्मोदते कालिका।।**[10]

अत्र कामरूपनरेशे युद्धार्थं प्रस्थिते कालिकाऽसृङ्मदपानेन मोदत इति निगद्य बीभत्सरसः द्योतितः। एवमेव हास्यरसपरिपाको यथा–

**मेषो वृषो वा वद लग्नकं किं, ज्योतिर्विदैवं परिपृष्ट ऊचे।**
**द्वयं त्वमेवासि न वेत्सि किं स्वत्र लग्नकान्वेषणमत्र युक्तम्।।**[11]

ज्योतिर्विदा मेषो वृषो वेति पृष्टलग्नः त्वमेव लग्नद्वयमसि, मेषरूपो वाऽसि अन्यत्र किमन्वेषणीयमिति हास्यरसो रस्यते। एवमेव अद्भुतरसयोजना यथा–

**नारोपि चापममुना श्रुतिमूलचुम्बि नास्पर्शि वैरिजनितासु भुजङ्गखड्गः।**
**नाबन्धि च भ्रुकुटिकोटिरथापि तस्य विड्भूमिपाः पदनता अभिषेकमागात्।।**[12]

अत्र कार्तवीर्येण विनैव दण्डं सकलदुष्टानां दमनं कृतमिति वर्णनाद् विभावनाऽलङ्कारव्यञ्जितः अद्भूतरसः परिपुष्टो विद्योतते।

एवमेव कार्तवीर्यं स्वकुलतनयमभिषिच्य सकलराज्यभारञ्च परित्यज्य वनं यियासोः कृतवीर्यस्य चित्रणं कारुण्यमुद्भावयितुं प्रभवति।

यथा त्रयाणां पुरुषार्थानां साफल्यं मोक्षरूपचतुर्थपुरुषार्थोपलब्धौ वर्तते, तथैव सर्वेषां रसानां पर्यवसानं शान्तरसे वर्तत इति आनन्दवर्धनवचनमनुपालयता महाकविसुकृतिदत्तेन महाकाव्यान्ते शान्तरसस्य वर्णनमपि कृतमस्ति। षोडशसर्गे कविना कार्तवीर्यमुखात् चिदानन्दप्राप्तिर्मुक्तिरिति प्रतिपाद्य शान्तरसस्य प्राधान्यं संसूचितम्। यथा–

**वेत्तुश्च वेद्यस्य विदो विभागविद् न विद्यते यत्र विदिश्रुतौ श्रुता।**
**आनन्दसन्दोहरवनीजनिस्सा सा मुक्त्यवस्थाऽखिलदुःखनशिनी।।**
**श्रेयोभिरन्यैर्जलबुद्बुदाभैः उपक्रिया का परमार्थदुःखैः।**
**निःश्रेयसन्नित्यमनो भजध्वं नास्मात्परं श्रेय उदाहरन्ति।।**[13]

अत्र परमात्मनः परमपदमवाप्तुं प्रयत्नशीलं जीवनमेव सर्वोत्कृष्टं श्लाघनीयं जीवनमतः सर्वदा तत्र यतनीयमिति राजोचितविलासवैभवादिभिः सुखैरञ्चितस्य कार्तवीर्यस्य मुखादेवंविधोक्तिरपि शान्तरसस्य परिष्कारिका एव।

अतः शृङ्गारप्रधानेऽपि महाकाव्येऽस्मिन् धर्मार्थयोः मोक्षोपायस्य च तुल्यं

महात्म्यमङ्गीकृत्य महाकविः शान्तरसस्य परिपाकपूर्वकं महदादर्शं जीवनं स्थापयितुं प्रयतत इति महाकाव्यस्यास्य विशिष्ट आस्वादपक्षः इत्याकलनीयम्।

कार्तवीर्योदये महाकविस्सुकृतिदत्तस्य परमेश्वरभक्तिस्तु नास्तिकानामपि समवायमास्तिकीकर्तुं समर्था। स खलु मुक्तमनसा आत्मानं सर्वविधदुष्कृतभाजनमिव मत्वा परमेश्वरं शरणं कामयते, दिङ्मात्रमुदाह्रियते-

**अजन्मनाशोऽस्ति भवप्रवाहो न लीयतेऽपि प्रलये पुरेव।**
**यद्वासनारूपमिमन्निरोद्धुमीष्टे न शिष्टेऽपि हरौ नृणां सः।।**[14]

एवञ्च कार्तवीर्यकनकप्रभयोः पावनामृतस्वरूपा भवव्याधिसंतारणात्मिका कथा विदुषां कृते भैषजमिव वर्तते। तद्यथा-

**कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान्।**
**तस्य स्मरणमात्रेण गतं नष्टञ्च लभ्यते।**

इति मनसि निधाय कार्तवीर्यकनकप्रभयोरमृतोपमां कथामास्वाद्य ब्रह्मानन्द-सहोदरमानन्दमाप्नुवन्ति जनाः।

अतः महाकाव्येऽस्मिन् रससिद्धस्य कवेरस्य शास्त्रीयं वैदुष्यं, भावाभिव्यञ्जनं, शब्दसौष्ठवं, विविधैः रसैः परिपुष्टं प्रयोगनैपुण्यञ्च सर्वानन्यान् कवीन्नतिशय्य विराजते।

❖

## सन्दर्भाः


1. नाट्यशास्त्रम् 6
2. ध्वन्यालोकः, कारिका सं. 65
3. ध्वन्यालोकः, आचार्यचण्डिकाप्रसादशुक्लः विश्वविद्यालय प्रकाशन, वाराणसी
4. कीर्तवीर्योदयम् 12.132
5. काव्यप्रकाशः, 8 उल्लासः, सूत्रसंख्या 89
6. कार्तवीर्योदयम् 2.26
7. तदेव 2.13
8. कार्तवीर्योदयम् 6.44
9. तदेव 11.87
10. तदेव 12.131
11. तदेव 14.46
12. तदेव 8.41
13. तदेव 16.97-98
14. तदेव 16.73


❖



# कौटिलीयस्यार्थशास्त्रस्य महत्त्वम्

डॉ. महेश केवटः

अर्थशास्त्रं प्राचीनस्य भारतीयस्य राजशास्त्रस्य प्रमुखो ग्रन्थः। कौटिलीयम् अर्थशास्त्रमारम्भकालादेव भारतवर्षस्य गौरवग्रन्थो बभूव। मैसूरनिवासिना शामशास्त्रिणा 1905 ई. वर्षे अस्य ग्रन्थस्य अनुसन्धानं कृतम्, तदनु 1909 ई. वर्षे Indian Antiquary पत्रिकायां प्रकाशितमिदम्। 1915 ई. वर्षे तेन ग्रन्थस्यास्य आंग्लभाषानुवादः प्रकाशितः। ततः पूर्वम् अर्थशास्त्रं कौटिल्यो वा नाममात्रेण निर्दिष्टः आसीत्।

अर्थशास्त्रस्य प्रकाशनात् अनन्तरं भारते वर्षे राजशास्त्रमाधिकृत्य अर्थशास्त्रं चावलम्ब्य अनेकाः समालोचनाः उपक्रान्ताः। अर्थशास्त्रस्य अनेकाः प्राचीनाः टीकाश्चोपलब्धाः। गणपतिशास्त्रिणा अर्थशास्त्रस्य 'श्रीमूला' नाम संस्कृतव्याख्या विशेषरूपेण रचिता। देशे विदेशेषु च प्रायः चतुर्दशसु भाषासु अनेकानि रूपान्तराणि व्याख्यानानि च ग्रन्थस्यास्य सम्पन्नानि। अनेन ग्रन्थेन संस्कृतसाहित्यं गौरवान्वितं वर्तते यतो हि कस्यामपि विश्वभाषायाम् एतादृशः व्यवस्थितः प्राचीनो राजशास्त्रग्रन्थो नास्ति।

अर्थशास्त्रस्य लेखकः कौटिल्यः नन्दवंशस्य विनाशकेन चाणक्येन विष्णुगुप्तेन वा अभिन्नः स्वीक्रियते। स एव नन्दवंशं विनाश्य पाटलिपुत्रस्य सिंहासने चन्द्रगुप्तं मौर्यं स्थापयामास इति घटना इतिहासे प्रसिद्धा। अर्थशास्त्रस्य अन्तिमेऽधिकरणे श्लोकोऽयं तत्सम्बद्धो लभ्यते-

**येन शास्त्रं च शस्त्रं च नन्दराजगता च भूः।**
**अमर्षेणोद्धृतान्याशु तेन शास्त्रमिदं कृतम्।।**15.1.311

अतो बहूनां विदुषां विचारो वर्तते यत् नन्दवंशविनाशकः कौटिल्यः एवाऽस्य लेखकः। तस्य कालः 300 ई पू. इति मन्यते। किन्तु पाश्चात्त्याः इतिहासकाराः अर्थशास्त्रस्य तादृशं पुरातनं कालं न स्वीकुर्वन्ति। जौली-कीथ-विन्टरनित्सप्रभृतयो यूरोपीयविद्वांसः द्वितीयशताब्दमेव कौटिल्यस्य कालं कल्पयन्तः कौटिल्यचाणक्ययोः भिन्नतां मन्यन्ते। तथापि सम्प्रति भारतीयं मतमेव प्राबल्यं लभते।

## अर्थशास्त्रस्य महत्त्वम्

कौटिल्येन अर्थशास्त्रस्य रचना राजतन्त्रमाश्रित्य कृतेति न सन्देहः। किन्तु तत्र निरूपितं राजतन्त्रं राज्ञः अनियन्त्रितम् (निरङ्कुशम्) आधिपत्यं न समर्थयति अपितु सचिवायत्तस्य राजतन्त्रस्य समर्थकम् अस्ति राज्ञः कर्तव्येषु प्रजानां हितं जनकल्याणाय कार्यविस्तारश्चेति मुख्यतया उपदिष्टं वर्तते।

अपि च प्रजानां जीवनस्य सम्पत्तेश्च रक्षणाय विधिपूर्वको व्यवहारः तदर्थञ्च राज्ञः सावधानता अपेक्षिता इत्यपि कौटिल्यः प्रतिपादयति। राजा स्वराज्ये प्रजानां योगक्षेमार्थं (जीविकार्थम्) यां शासनव्यवस्थां प्रवर्तयति, तस्याः पारिभाषिकी संज्ञा 'तन्त्रम्' इति वर्तते। पुनः राज्ञः कर्त्तव्यतया परराष्ट्रसम्बन्धोऽपि निरूपितः अर्थशास्त्रकारेण। तत्प्रसङ्गेन विजिगीषोः राज्ञः पक्षे षाड्गुण्यप्रयोगोऽपि विवेचितः। अयम् 'आवापः' इति कथ्यते।

एवम् अर्थशास्त्रस्य अधिकरणानि तन्त्रावापदृष्ट्या संयोजितानि। तन्त्रोधिकारः (अधिकरणम् 1-6), आवापाधिकारः (अधिकरणम् 7-13), शेषाधिकारः (अधिकरणम् 14,15) इति रूपेण अर्थशास्त्रं विभज्यते। अनेन राज्ञः स्वराज्यविषया नीतिः परराष्ट्रनीतिश्च राजशास्त्रस्य विषयद्वयम् इति कौटिल्येन दर्शितम्।

अर्थशास्त्रकारः कौटिल्यः तन्त्रविषये सामाजिकीं व्यवस्थां वर्णयति। प्रजानां लोकयात्रासञ्चारणाय राजा दण्डधरो भूत्वा शासनं करोति। सः अराजकतायाः निवारणाय उपद्रविणः सम्यक् दण्डयति। कौटिल्यस्य विश्वासो वर्तते यत् वर्णाश्रमधर्मस्य सम्यक् पालनेन राजव्यवस्था दृढायते। वेदसम्मतं धर्मं पालयन् जनः सर्वत्र सुखी भवति। यथोक्तं कौटिल्येन-

**व्यवस्थितार्यमर्यादः कृतवर्णाश्रमस्थितिः।**
**त्रय्या हि रक्षितो लोकः प्रसीदति न सीदति।।**



आत्मसम्पदा युक्तः नीतिज्ञो राजा अल्पकायस्य राज्यस्य शासनं कुर्वन्नपि प्रकृतिसम्पदा सम्पन्नो भूत्वा समस्तं भूतलं जेतुं समर्थः। अत्र कौटिल्यः कथयति-

**आत्मवाँस्त्वल्पदेशोऽपि युक्तः प्रकृतिसम्पदा।**
**नयज्ञः पृथिवीं कृत्स्नां जयत्येव न हीयते।।**

प्रकृतयः सप्तैव प्रतिपादिताः-स्वामी, अमात्यः, जनपदः, दुर्गः, कोषः, दण्डः मित्रञ्च। राज्ञः स्वजीवनमपि संयमपूर्णं भवति। अद्यापि प्रशासकानां कृते संयमः आवश्यकः। कौटिल्यः विषयेऽस्मिन् कथयति-

**तस्मात् अरिषड्वर्गत्यागेन इन्द्रियजयं कुर्वीत, वृद्धसंयोगेन प्रज्ञाम्, चारेण चक्षुः, उत्थानेन योगक्षेमम्, धर्मकार्यानुशासनेन स्वधर्मस्थापनम्, विद्योपदेशेन विनयम्, अर्थसंयोगेन लोकप्रियम्, हितेन वृत्तम् (वर्धयेत्)।**

राजा यदि उत्थानगुणमालम्बते तदा सर्वे कर्मचारिणः तथैव कुर्वन्ति। अपरत्र यदि राजा प्रमादयुक्तः, तस्य अनुचराः अपि प्रमादिनो भवन्ति। तथा च कौटिल्यः आह-

**"राजानम् उत्तिष्ठमानम् अनुतिष्ठन्ते भृत्याः प्रमाद्यन्तम् अनुप्रमाद्यन्ति कर्माणि भक्षयन्ति"** इति। अद्यापि इदं सत्यमेव।

प्रजानां हितं प्रियं च कार्यं राज्ञः सुखाय भवति-

**प्रजासुखे सुखं राज्ञः प्रजानां तु प्रिये हितम्।।**
**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम्।।**

प्राचीने भारते वर्षे शासनतन्त्रं कथं प्रवर्तते स्म इत्यस्य सम्पूर्णम् आदर्शभूतञ्च चित्रम् अर्थशास्त्रे प्रकटितम्। तत् वर्तमानं कर्मचारितन्त्रं प्रतीयते। विभिन्नेषु शासनविभागेषु अध्यक्षाः, उपाध्यक्षाः, उपायुक्ताः, लेखकाः, समाहर्तारः सन्निधातारश्च नियुक्ताः बभूवुः। एवं सम्पूर्णे राजशासने विभागाः, उपविभागाश्च क्रियन्ते स्म। बहवः कर्मचारिणः अमात्याश्च राज्ञः शासननीतिं पालयन्ति स्म। अस्मिन् ग्रन्थे प्रजानां हितस्य न कोऽपि विषयः उपेक्षितः। राज्ञः सम्यक् शासनतन्त्रेण प्रजाः प्रसन्नाः भवन्ति।

राजा दण्डधरः भवेत्। सर्वापराधेषु आदर्शस्थापनाय प्रजाः दण्डयेत्। दण्डस्य व्यवस्थापि अनेकविधा भवति स्म। किन्तु तस्य उद्देश्यं धर्मस्य रक्षैव।

अर्थशास्त्रे कौटिल्यः परराष्ट्रसम्बन्धञ्च सम्यक् विवेचयति। तस्मिन् प्रसङ्गे षाड्गुण्यं प्रतिपादितम्। षाड्गुण्यं नाम सन्धिः, विग्रहः, यानम्, आसनम्, द्वैधीभावः समाश्रयश्च। कदाचित् राजा एतेषु गुणेषु कस्यापि प्रयोगं करोति। यदि परराज्यशासनं दुर्बलं प्रजाश्च असन्तुष्टाः तदा प्रबलो राजा आक्रमणं करोति। संग्रामे कपटपूर्णाः उपायाः अपि प्रयुज्यन्ते। अत्र कौटिल्यस्य सम्मतिः शत्रुविनाशाय मन्त्रौषधिप्रयोगोऽपि नानुचितः इति।

एवम् अर्थशास्त्रं राजनीतेः सर्वान् पक्षान् विवेचयति। न्यूनाधिकरूपेण अद्यापि राजनीतिप्रश्नाः पूर्ववदेव सन्ति। अतो राजतन्त्रे समाप्तेऽपि निर्वाचितसदस्येषु मन्त्रिषु शासनाधिकारे आरोपिते अर्थशास्त्रे विहिताः प्रशासनविषयाः बहुमूल्याः पालनीयाश्च सन्ति।

वस्तुतो विभिन्नेषु ग्रन्थेषु विच्छिन्नानां राजविषयाणां संकलितरूपेण प्रतिपादकः व्यवस्थितो ग्रन्थः अर्थशास्त्रमेव। अस्यैव पद्यात्मकं संस्करणं 'कामन्दकनीतिः' इत्यादि वर्तते। सर्वथापि संस्कृसाहित्यस्य भारतीयराजशास्त्रस्य च सुसंघटितो गौरवग्रन्थः कौटिलीयमर्थशास्त्रमिति।

❖



# रामकथाश्रितकाव्येषु 'भरतचरितम्'

डॉ. सुनीलकुमारप्रधानः

मर्यादापुरुषोत्तमरामस्य चरितं भारतीयसंस्कृतेः सर्वाधिकं लोकप्रियम् आख्यानं वर्तते। आदिकाव्यं रामायणम् एतस्य मुख्यः आधारः। 'रामायन सत कोटि अपारा' इत्यनेन गोस्वामितुलसीदासः रामायणानाम् अधिकतां मनुते। वेदान्तभूमौ रामभक्ति-प्रतिपादके 'अध्यात्मरामायणे' रामकथाश्रितग्रन्थानां बहूनि नामानि प्राप्यन्ते।[1] तत्र रामायण–अध्यात्मरामायण–अध्यात्मरामचरित–रामसंहिता–अधिरामसंहितेत्यादीनि मुख्यानि विद्यन्ते। एतदतिरिच्य रामायणग्रन्थेषु भुशुडिरामायण–योगवाशिष्ठरामायण-आनन्दरामायणान्यपि उल्लेखनीयान्येव। महाभारते[2] रामकथा वन–शान्ति–द्रोणपर्वसु रामोपाख्यानमिति नाम्ना लभ्यते। अपरन्तु मंहाकाव्यस्य सुदीर्घपरम्परायां प्राप्तेयं रामकथा द्विधा विभक्तेति भाति–

(क) रामस्य वर्णनं भिन्नपात्रैः देवैः मानवैः वा सह;

(ख) आद्यन्तं रामकथायाः अग्रसारणम्।

उक्तनिरूपिते रामकथाश्रितकाव्ये प्रथमश्रेण्यां कालिदासप्रणीतं रघुवंशं क्षेमेन्द्ररचितं दशावतारचरितञ्च उल्लेख्ये स्तः। यत्र रामकथा आद्योपान्तं वर्णिता तादृशेषु महाकाव्येषु कुमारदासस्य जानकीहरणम्, क्षेमेन्द्रस्य रामायणमञ्जरी, साकल्यवल्ल-भाचार्यस्योदारराघवम्, अभिनन्दस्य रघुवीरचरितमादिकाव्यानि प्रसिद्धानि सन्ति। येषु उत्तरकालीनेषु काव्यग्रन्थेषु रामकथा प्राप्यते तेषु वामनभट्टबाणस्य रघुनाथचरितम्, रघुनाथोपाध्यायस्य रामविजयमहाकाव्यम् मोहनस्वामिनः रामरहस्यमित्यादिमहाकाव्यानि सन्ति। पुनश्च, रामविषयकाणि श्लेष[3]–व्याकरण[4]–ऐतिहासिक[5]–गीतिकाव्यान्यपि[6] बहुशः उपलभ्यन्ते एव।

रामकथामवलम्ब्य उपर्युक्तकाव्यग्रन्थानां प्रतिपाद्यन्तु रामस्योदात्तचरितस्य वर्णनमेव। परञ्च रचनाशिल्पदृष्ट्या एतेषु पर्याप्तं भेदाः दृष्टिगताः भवन्ति। महाभारते रामोपाख्याने

रामस्य जन्मतः राज्यारोहणं यावद् एका सामान्यकथा वाल्मीकेः रामकथातः सर्वथा भिन्ना वर्तते। जानकीहरणस्य शृङ्गारिकता, रामचरिते रावणस्य विस्तृतं सम्भोगवर्णनं तथा च रामायणमञ्जर्यां मौलिककल्पनाभिः कथानकस्यास्तव्यस्तता नितरां विद्रूपतां जनयति। फलतः रामायणोत्तरेषु सर्वेष्वपि काव्येषु तथा स्वस्थरामकथा न दृश्यते यथा रामायणे विद्यते। अत्र हि भक्तिरसाप्लाविताः अतिशयोक्तिपूर्णसंवादाः अपि सर्वथा अरुचिकराः एव। स्वकीयकलात्मकप्रवृत्तीनां कारणतः सामान्यजनाः स्वस्थजीवनशैल्याः दूरीकृताः। अपरत्र यत्र रामानुजः भरतः काव्यनायकत्वेन निरूपितः तादृशानां महाकाव्यानां सुतरामभावोऽपि परिलक्ष्यते।

पण्डितभवानीदत्तशर्मणा प्रणीतं भरतचरितं महाकाव्यं वस्तुतः रामकथाश्रितमेव यत्र कैकेयीसुतस्य भरतस्य भव्यचरितं पञ्चदशसु सर्गेषु निबद्धमस्ति। ग्रन्थेऽस्मिन् अभिव्यञ्जनायाः विविधशैल्याः समुचितसन्निवेशः विद्यते। कवेः रसयुता वर्णनशैली केकयराज्यवर्णने[7] रामराज्यवर्णने[8] प्रभातवर्णने[9] तथा च भरतस्य विषादवर्णनक्रमे विशिष्टतया दृष्टिगता भवति। केषुचित् वर्णनेषु विचित्रनूतनता परिदृश्यते या परम्परागतकाव्यवर्णनेभ्यः पृथगेव। पश्यामस्तावदेकं हृद्यं वर्णनम्–

**कृषीबलानां निहिताङ्कबाला भार्या मुदा सम्पिपिषुश्च सक्तून्।**
**कलं जगुः सम्मिलितस्वरेण ग्राम्याणि गीतानि मनोहराणि।।**[10]

केवलं केकयराज्यवर्णनेन कविवरशर्मा आदिकवेः समान्तरं समागच्छति। वर्णनेषु वैविध्यं वाक्चातुर्यञ्च कवेर्वैशिष्ट्यम्। संवादशैल्या कथानके गतिः पात्राणां चरितोद्घाटनञ्च भवेदिति काव्यशास्त्रिणः। अत्रैषा शैली प्रतिपदं प्रस्फुटति। भरतः मातरं पृच्छति–'क्व चासि मे जीवितरामभद्रः?'[11] माता कैकेयी उदतरत् 'तवाग्रजो भूमिसुतासहायः सौमित्रिणा साकमगादरण्यम्।'[12] चित्रकूटे प्रवर्तमानः रामभरतसंवादः एवञ्च भरतहनुमत्संवादोऽपि समानरूपेण सहृदयानाह्लादयतः।

उपदेशात्मकता भारतीयधार्मिकविवृतेः यथेष्टा आधारशिला वर्तते। विषादग्रस्त-भरतमाध्यमेन कवेरुपदेशाः पुनश्चाधुनिकरामराज्यसंकल्पनासन्दर्भे कविनिर्दिष्टतथ्यानि सुतरामनुकरणीयानि।[13] एतस्यामुपदेशशैल्यां कविप्रयुक्तोऽर्थान्तरन्यासः[14] इतोऽपि तत्त्वप्रतिपादकः सञ्जातोऽस्ति। भावात्मकता भरतचरितस्य प्राणभूतं तत्त्वं वरीवर्ति। प्रतिस्थलं मानवीयमनोभावानां मार्मिकं चित्रणं दृश्यते। इह हि विरहविदग्धस्य भरतस्य



अखिलव्यापाराः भ्रातृप्रेमाभिषिक्तत्वात् नितरां भावगर्भिताः सन्ति। विप्रलम्भे करुणस्य योजना[15] भ्रातृप्रेमजन्यकरुणया पुनरेकवारं रामराज्यस्य संस्थापना[16] च काव्यस्य मौलिकी विशिष्टतास्ति। क्वचिद् भावप्रवाहप्रसङ्गे शब्दानां ग्राम्यप्रयोगाः[17] स्वाभाविकतामेव जनयन्ति। अत्रापि मर्यादायाः रक्षा कवेः प्रौढकाव्यरचनाक्षमतां द्योतयति।

कवेः नव्यदृष्टिरपि काव्ये चारुतां सम्पोषयति। धनविषये 'बीजं गुरुत्वे धनमेकमेव' इति घोषयन् कविः 'धनैषिणो धिक् बहुपापभाजः' अपि निगदति यतो हि दस्युजनप्रवृत्तिं समाचर्य्य 'बलेन वित्तस्य विशेयुरज्ञाः सभां नृपस्यापि विवेकशून्याः।' साम्यवादस्य बीजन्तु दृश्यते अस्मिन् व्यङ्ग्ये एव–

**किमेतदिष्टं धनिनां पिबेयुः श्वानः पयो दीनजनार्भकाश्च।**
**क्षुधाभिभूताः कृशयोर्जनन्याः पयोऽस्रमिश्रं स्तनयोः प्रसह्य।।**[18]

मातृनिन्दा नोचितेति सन्दर्भे स्पष्टा घोषणा कवेः 'न चापि निन्द्यं चरितं जनन्याः।' सतीत्वं पतिव्रतेति विशेषणपदानि नारीणां कृते परम्पराप्रथितानि किन्त्वत्र पुरुषाणां कृते 'कुतः काम्याः स्वयं तेषां परनारीविदूषणे' एवञ्च 'गृहे प्रियामेव समर्हणीयां जानीयुरिष्टां गृहस्वामिनीञ्च' इत्युक्त्वा आदर्शमेकं स्थापयति।[19] राष्ट्रप्रेम कवितारमण्याः मूलस्वरः, यतः कविरयं स्वीकरोति–'रक्षार्थं जन्मभूमेश्च सर्वे सञ्चित-शक्तयः।' एकस्मिन् स्थले 'नो ज्ञानिनो नापि गृहीतधर्माः' द्वारा कविः तादृशान् जनान् लक्ष्यीकरोति ये यतिरूपं ग्रहीतुं स्वीयान् प्रियान् जनान् त्यक्त्वा वनं व्रजन्ति। भ्रातृप्रेम्णा निर्मितोऽयं काव्यप्रसादः भारतस्य भव्यरूपमाधातुं सहायकः भवेदिति कवेरभिलाषा।

भरतचरितं रामकथाश्रितकाव्यशृङ्खलायाः एकं समन्वयात्मकं काव्यं विद्यते। मधुरप्रसङ्गानां स्निग्धोद्भावनायां लोकजीवनस्य कट्वनुभवाः सन्निहिताः सन्ति। अत्र यथार्थस्य स्फुटनिरूपणे[20] अपि भविष्यनिर्मातुरादर्शस्य दिव्यरश्मयः वर्तमानाः सन्ति। अभिव्यञ्जनायाः वर्णनसंवादोपदेशभावात्मिकाः सरण्यः कविना कुशलतया प्रयुक्ताः। काव्यरचनायाः पृष्ठभूमिः, नूतनवस्तु, विलक्षणः काव्यनेता, प्रकृष्टशिल्पविधानं तथा च आधुनिकं बिम्बविधानमेतत् प्रमाणीकरोति यत् महाकाव्यमिदं सर्वेषु रामकथाश्रित-काव्येषु विशिष्टं स्थानमलङ्करोति। समासतः काव्येऽस्मिन् सर्वत्र दृष्टिगोचरः समन्वया-त्मको भावः सहृदयानां मनसि लोकोत्तरम् आनन्दम् उत्पादयितुं क्षमः इति दिक्।

❖

## सन्दर्भाः

1. अध्यात्मरामायाणम्, बालकाण्डम्, 1-4
   ,,   ,,   युद्धकाण्डम्, 16-44
2. महाभारतम्, वनपर्व, अध्यायाः 274-91
3. राघवपाण्डवीयम्, राघवनैषधीयम्, राघवपाण्डवयादवीयम्
4. भट्टिकाव्यम्
5. रघुनाथाभ्युदयम्
6. रामगीतगोविन्दम्
7. भरतचरितम्, 2/1-194
8. भरतचरितम्, 15/1-76
9. भरतचरितम्, 4/2-23
10. भरतचरितम्, 4/19, द्रष्टव्यम्-2/80, 5/57-77
11. भरतचरितम्, 5/47
12. भरतचरितम्, 5/53
13. भरतचरितम्, 15/79, 81
14. भरतचरितम्, 5/84, 12/60
15. भरतचरितम्, 1/14,
    'चक्रन्द चार्चासमये कदाचिच्चिरं वियोगात् पतदश्रुधारम्।'
16. भरतचरितम्, 15/78,
    'सदा कारुण्यसिन्धोश्च कारुण्यं सततं भवेत्।'
17. ,, 2/44, 79, 180, 14/76
18. ,, 4/70
19. ,, 15/81, 4/60
20. ,, 4/66
    'समाजनिर्माणविधौ धनेशाः प्रत्यूहभूताश्च निर्वहणीयाः।
    धनानि तेषां प्रसभं क्षुधार्तैः ग्राह्याणि निःस्वैश्च कृपाणहस्तैः।।'


❖



# भारतीयनाट्यपरम्परायां प्रतीकनाटकानां विकासः

डॉ. मिथिलेशकुमारपाण्डेयः

काव्यस्य रूपद्वयं दृश्यकाव्यं श्रव्यकाव्यञ्च। तयोः द्वयोः रूपयोः दृश्यकाव्यं सर्वाधिकं महत्त्वपूर्णं लोकविश्रुतं च। दृश्यकाव्यमपि रूपकम् उपरूपकमिति भेदयोः विभक्तमस्ति। रूपकस्य दशसु अपि भेदेषु नाटकं सर्वप्रमुखमिति मन्यते। नाटकान्यपि बहुविधानि दृश्यन्ते। एतासु सर्वासु बिधासु प्रतीकनाटकानां परम्परा विलक्षणा वर्त्तते। प्रतीकनाटकानि एतादृशानि नाटकानि भवन्ति येषु अमूर्तभावाः पदार्थाः वा पात्रीक्रियन्ते, अर्थात् मूर्तपात्ररूपेण उपस्थाप्यन्ते। भावानां पात्राणां वा रोचकतामुद्दिश्य एवं क्रियते। अनेन कथानकं बोधगम्यं भवति। एतेषु नाटकेषु अमूर्त्ताः मूर्त्तरूपेण प्रदर्श्यन्ते तथा च ते सामान्यनाटकस्य पात्राणीव आचरन्ति।

प्रतीकमाध्यमान भावाभिव्यक्तेः प्रक्रियायाः सङ्केतो वैदिकग्रन्थेषु प्राप्यते। उपनिषत्सु लोकः वृक्षरूपेण कल्पितः। अस्मिन् वृक्षे जीवात्मा परमात्मा चेति पक्षिणौ निवसतः ययोः एकः फलानि पुषाणि च स्वदते तथा च अपरः ततः असम्पृक्तः। वैदिकोत्तरकालेऽपि प्रतीकानां एवंविधा बहुप्रयोगोः प्राप्यन्ते। संस्कृतस्य नाटकेष्वेतेषां एतेषां प्रतीकरूपाणाम् अधिकाः प्रयोगाः उपलभ्यन्ते। किन्त्वस्य पूर्णः सफलश्च परिपाकः श्रीकृष्णमिश्ररचिते प्रबोधचन्द्रोदये एव दरीदृश्यते। नाटकानामेतेषां परम्परा अद्यावधि प्रचलत्येव तथापीदं नाट्यविधानं काठिन्यक्लिष्टत्वान्यतरकारणात् विदुषां बुद्धिविलासः एव न तु सहृदयसंवेद्यम्। एवं च एतादृशानि नाटकानि अल्पान्येव विलिखितानि जातानि। एतेषां नाटकानां वैशिष्ट्यसम्बन्धे डॉ.दशरथ ओझा कथयति "अस्याः शैल्याः प्रथमं वैशिष्ट्यं मानवमनसां सूक्ष्मतत्त्वानि पात्ररूपेण प्रदर्श्य अध्यात्मस्य दुर्ज्ञेयरहस्यानां बोधायात्र प्रयासो दृश्यते। अमूर्त्तपदार्थानां मूर्त्तरूपेण प्रस्तुतीकरणम् अस्याः शैल्याः वैशिष्ट्यमस्ति। अस्याः शैल्याः नाटकानां तिस्रः प्रमुखाः श्रेण्यः

सन्ति–प्रथमश्रेण्यां तानि नाटकानि सन्ति येषां कथानके रसात्मकतया साकमेव आद्यन्तं चमत्कृतिः प्रदर्शिता भवति। द्वितीयस्यां श्रेण्यां तानि नाटकानि सन्ति येषु प्रस्तुताऽर्थपेक्षया अप्रस्तुतार्थे चमत्कृतिः भवति, तथा तृतीयश्रेण्यां तानि नाटकानि सन्ति–येषु कानिचन पात्राणि 'मानवीयानि' भवन्ति तथा कानिचन मानवीकृतानि।

न केवलं भारतवर्षे संस्कृतसाहित्ये अमूर्त्तभावानां मूर्तीकरणस्य प्रयासः कृतः, अपितु एवविधः प्रयासः विश्वस्य अन्यासु भाषास्वपि कृतो दृश्यते। जॉन बनियान-महाभागस्य 'ग्रैस एवाउण्डींग' इत्यस्मिन् पुस्तके एतादृशानि तत्त्वानि दर्शितानि। पतञ्जलिमहाभागस्य कंसवधनामकनाटके कृष्णपक्षः रक्तवर्णेन तथा कंसपक्षः कृष्णवर्णेन वर्णितोऽस्ति। भासस्य बालचरिते सर्वप्रथमम् अमूर्त्तभावानां पात्रीकरणस्य प्रयासः कृतः।

अश्वघोषस्य शारिपुत्रप्रकरणेन साकमेव अन्यत् नाटकद्वयं लूडर्समहाभागेन प्राप्तम्। विद्वांसः मन्यन्ते यत् ते नाटकेऽपि अश्वघोषस्य एव रचने स्तः। तयोः एकस्मिन् धृतिकीर्त्तिबुद्धिज्ञानयश आदयः अमूर्तभावमयपदार्थाः स्त्रीपुरुषपात्ररूपैः प्रदर्शिताः। काल्पनिकपदार्थेष्वेतेषु बुद्धः आगच्छति तथा च धर्मोपदेशं कुरुते। श्रीमद्-भागवतपुराणस्य चतुर्थे स्कन्धे पञ्चविंशतेः अध्यायतः अष्टाविंशतिम् अध्यायं यावत् प्रतीकानां माध्यमेन एव दार्शनिकतत्त्वानां विवेचनं प्राप्यते–

**इत्थं पुरञ्जनं सम्यग् वशमानीय विभ्रमैः।**
**पुरञ्जनी महाराजं रेमे रमयती पतिम्।।**

अत्र पुरञ्जनपदं पुरुषपरम्, पुरञ्जनीपद्म् च बुद्धिपरम् एवमेव सर्वत्र।

प्रबोधचन्द्रोदयतुल्यानां दर्शनिकरूपकात्मकनाटकानां प्रणयनस्य सम्बन्धे तत्कालीनानां सामाजिकीनां सांस्कृतिकपरिस्थितीनाञ्च महत्त्वपूर्णा भूमिका परिलक्ष्यते। यद्यपि अस्य अन्यानि अपि कारणानि आसन् किन्तु एतत्सम्बन्धे सामाजिक-सांस्कृतिककारणानि सर्वप्रमुखानि आसन्। साहित्यं समाजस्य दर्पणो भवति। किमपि साहित्यं समकालीनसामाजिकसांस्कृतिकमूल्यान्युपेक्ष्य जीवितुं नोत्सहते। लेखकः समकालीनप्रवृत्तिभिः अवश्यमेव प्रभावितो भवति। संस्कृतस्य रूपकात्मक-नाटकान्यपि एतोषामेव विशिष्टपरिस्थितीनां कारणेन उत्पन्नानि अभवन् इति प्रतीयते।



भारतवर्षे बौद्धधर्मस्य जैनधर्मस्य च प्रभावः ई.पू. षष्ठ -ख्रीष्टाब्दस्य पश्चात् तथा ईस्वीयस्य प्रारम्भिकेषु ख्रीष्टाब्देषु पर्याप्तम् अवर्धत। कनिष्कस्य पूर्ववर्तिनां मौर्याणां च राज्याश्रयेण अपि पर्याप्तं प्रोत्साहनम् एताभ्याम् अधिगतम्। हर्षस्य काले तथा च हर्षोत्तरकालेऽपि एताभ्यां पर्याप्तः विस्तारः प्राप्तः। एते धर्माः सरलसिद्धान्तान् आश्रित्य प्रतिष्ठां भजन्ते स्म। अतएव निम्नतरवर्गेषु उच्चवर्गेषु अपि क्षत्रियेषु एते धर्माः प्रतिष्ठां प्राप्तवन्तः। अत्र एतद् उल्लेखनीयमस्ति यत् प्रतीकात्मक-दार्शनिकनाटकानां लेखनस्य श्रीगणेशः बौद्धैः एव कृतः। अश्वघोषस्य त्रुटितकृत्या एतत् प्रमाणितं भवति। बौद्धैः जैनैः च स्वस्वसिद्धान्तानां प्रचारार्थं दृश्यकाव्यस्य अस्य विधानस्य प्रयोगः कृतः। यदा भारतवर्षे यवनाधिपत्यं द्वादशख्रीष्टाब्दे अभवत् तदा भारतीयेषु धर्मान्तरणस्य प्रक्रिया अपि समारब्धा। एतस्मात् कारणात् तथा च सूफी–आन्दोलनस्य कारणात् धर्मान्तरणस्य प्रक्रिया तीव्रतरा अभवत्। इयमेका विचित्रा स्थितिः आसीत्। न केवलं निम्नवर्गीयाः जनाः अपितु उच्चवर्गीयाः जनाः अपि परम्परागतं वैदिकं धर्मं विहाय इस्लाममतं ग्रहीतुम् उन्मुखाः अभवन्। अतएव एतासु एव विशिष्टविषमपरिस्थितिषु परम्परागतानां वैदिकधर्मदर्शनसम्प्रदायानां रक्षणार्थं भक्त्यान्दोलनस्य प्रादुर्भावः अभवत्। किन्तु अनेन परम्परागतस्य वैदिकषड्दर्शनस्य रक्षणं दुष्करमासीत् यतः वैदेशिक-शासनप्रभावात् देशे वैदिकधर्मस्य तादृशः प्रचारः असंभवः आसीत्। अतएव एतास्वेव विशिष्टासु परिस्थितिषु वैदिकधर्मस्य षड्दर्शनस्य च सिद्धान्तानां रक्षणार्थं तथा च सामान्यजनान् अवैदिकसम्प्रदायेभ्यः विमुखीकर्तुं संस्कृतभाषायां रूपकात्मकदार्शनिक-नाटकानां प्रणयनं समारब्धम्। यतो हि वेदान्तदर्शनमेव सर्वाधिकं लोकप्रियं दर्शनमासीत् अतएव सर्वाधिकानि नाटकानि वेदान्तमाश्रित्य एव विरचितानि जातानि।

एकादशशतके विरचितस्य श्रीकृष्णमिश्रस्य प्रबोधचन्द्रोदयस्य प्रेरणा संभवतः एतैः एव पूर्वतत्त्वैः प्राप्ता स्यात्। तस्य इदं नाटकं प्रतीकनाटकेषु सर्वाधिकं सफलमस्ति। अस्मिन् दार्शनिकमतानि नाटकीयपात्रैः अभिव्यक्तीकृतानि सन्ति। अस्य कथानकमतीव रोचकमस्ति। अस्य प्रधानरसः शान्तोऽस्ति। अस्मिन् अद्वैतवेदान्तस्य प्रतिपादनमस्ति। अस्मिन् ज्ञानभक्तिश्रद्धाविवेकमोहरतिरम्भादयः अमूर्त्तभावाः स्त्रीपुरुषपात्ररूपैः चित्रिताः। मायेश्वरसंयोगेन मनोनामकस्य पुत्रस्य उत्पत्तिः भवति। मनसः द्वे भार्ये–प्रवृत्तिः निवृत्तिश्च। प्रवृत्तेः मोहस्य तथा च तस्य सकलपरिवारस्य

जन्म भवति। निवृत्तेः राज्ञः विवेकस्य तथा च तस्य सकलपरिवारस्य जन्म भवति। उभयोः परिवारयोः मध्ये युद्धं प्रवर्तते। मोहपक्षतः कामः तथा च तस्य भार्या रतिः ब्राह्मणः दम्भः तथा च तस्य पितामहः अहङ्कारः, क्रोधः कामः तथा च तस्य भार्या हिंसा तृष्णा च युद्धे सहायकाः भवन्ति। मोहस्य विश्वासपात्राणि मित्राणि लोकायतः कापालिकः, बौद्धः, दिगम्बरजैनः चास्मिन् युद्धे तस्य पक्षतः सबलं विवादं कुर्वन्ति। अस्मिन् विवेकः जयति। तस्य पक्षतः शास्त्रकरुणाश्रद्धामैत्रीविष्णुभक्तिशमदमादयः भागं गृह्णन्ति। प्रबोधचन्द्रोदयस्य जन्मना अज्ञानान्धकारः समाप्तः भवति। प्रबोधचन्द्रोदयेन सुतरां लोकप्रियत्वं प्राप्तम् तथा चास्य बहुशः भाषान्तराणि जातानि। प्रबोधचन्द्रोदयं प्रतीकनाटकेषु सर्वाधिकं लोकप्रियमभवत् तथा च तत्पश्चात् तस्यानुकरणे बहुप्रतीकनाटकानि विलिखितानि जातानि। यशपालस्य मोहपराजयः त्रयोदशशताब्द्यां रचितं नाटकमस्ति। अस्मिन् आचार्येहेमचन्द्रस्य प्रभावेण कुमारपालस्य जैनधर्मेदीक्षाग्रहणं वर्णितमस्ति। नाटकमिदं सर्वप्रथमं कुमारविहारे महावीरस्वामिनः उत्सवस्य काले अभिनीतमासीत्। चतुर्दशशताब्द्यां वेदान्तदेशिकः संकल्पसूर्योदयस्य रचनां कृतवान्। अस्मिन् शान्तरसः सर्वश्रेष्ठ इति समुद्घोषितः। 1570 ईस्वीये कर्णपूरेण चैतन्य-चन्द्रोदयस्य रचना कृता। अस्मिन् चैतन्यस्य जीवनचरितं तथा तेन सह मूर्त्तामूर्तपात्राणां वार्तालापः प्रदर्शितोऽस्ति। अस्मिन् चैतन्यस्य दार्शनिकं मतं स्पष्टरूपेण प्रतिबिम्बित-मस्ति। षोडशशताब्द्यामेव गोकुलनाथेन अमृतोदयः तथा च रत्नखेटश्रीनिवासेन भावनापुरुषोत्तमः विरचितः। प्रायेण 1625 वि.स. भूदेवशुक्लेन धर्मविजयनामकं प्रतीकं नाटकं विरचितम्। आनन्दरायः (वेदकविः) अष्टादशशताब्द्यामेव नाटकद्वयं लिखितवान्-विद्यापरिणयनम् जीवानन्दनं च। एतयोः नाटकयोः शिवभक्तेः चरमोत्कर्षः प्रदर्शितः अस्ति। नल्लाहवरीमहाभागेन अष्यदशशताब्द्यामेव चित्तवृत्तिकल्याणः जीवन्मुक्तिकल्याणश्चेति नाटकद्वयं रचितम्। सामराजदीक्षितः 1783 विक्रमसंवति चैतन्यचन्द्रोदयस्य कथामाश्रित्य श्रीरामचरितं नाम प्रतीकनाटकं रचितवान्। विंशतिशताब्द्यां वाई. महालिङ्गशास्त्रिणा कलिप्रादुर्भावः विरचितः। प्रतीकात्मकशैल्याः एतेन नवीननिर्माणपरम्परा नाटकानां क्षेत्रे एकस्या नूतनायाः सङ्केतस्तु अवश्यं कृतः। किंतु तस्य पूर्णसमर्थनं न प्राप्तम्। बाबू द्विजेन्द्रलालरायः एनां प्रतीकात्मिकां शैलीं नाटक-परम्परायाः सुन्दराधाररूपेण न स्वीकरोति।

❖



# कठोपनिषदि लौकिकाः प्रसङ्गाः

डॉ. रविमोहनः

कृष्णयजुर्वेदस्य कठशाखान्तर्गता कठोपनिषद् यमनचिकेतसोः विशिष्टं संवादमाश्रित्य औपनिषदब्रह्मतत्त्वाख्यापकत्वेनातीव प्रसिद्धा विद्यते। नचिकेतसः पिता वाजश्रवसः विश्वजिन्नामके यज्ञे दानरूपेण शीर्णाः वृद्धाः गाः ददाति। तद् वीक्ष्य तत्पुत्रो बालो नचिकेताः 'तत कस्मै मां दास्यसि' इति पृच्छति। तत्प्रश्नेन क्रुद्धः पिता 'मृत्यवे त्वा ददामी' ति वदति। पितृवचनमनुसृत्य नचिकेताः मृत्युलोकं गत्वा मृत्युदेवात् यमात् वरत्रयं लभते। तेषु त्रिषु वरेषु ब्रह्मविद्याम् अन्यतमवररूपेण लब्ध्वा ब्रह्मविद् भवतीति बहुविश्रुतैषा कथा सम्पूर्णे संस्कृतवाङ्मये वैशिष्ट्यम् आरोहति। अत्र यद्यपि पारलौकिकाः आध्यात्मिकाः वा विषयाः मुख्यतां भजन्ते, तथापि कथाप्रसङ्गे संवादप्रथनकाले च ये केचन लोकप्रयुक्ताः व्यवहाराः, सामाजिकी व्यवस्था, विविधा एषणाः च अनुस्यूताः सन्ति तेऽत्र ऊह्याः विद्यन्ते।

## लौकिका व्यवहाराः

**(क) दानम्**–यज्ञादिषु दानस्य महत्त्वम् आसीदिति उपनिषद्यस्यां सुस्पष्टम्। किन्तु यादृशीनां गवां दानं वाजश्रवसेन क्रियते स्म, तद्दानं विफलमनुचितं वेति तत्रैव प्रतिध्वनितम्–

**पीतोदका जग्धतृणा दुग्धदोहा निरिन्द्रियाः।**
**अनन्दा नाम ते लोकास्तान् स गच्छति ता ददति।।** (क.उ.1.1.3)

एतादृशं दानम् असत्कृतम् अवज्ञातं वेति वक्तुं शक्यते, एतच्च गीतायां (गीता 17.22) तामसदानरूपेण वर्णितमस्ति, तच्च नन्ददायकं तु नैव भवति अपि तु अनन्ददायकत्वेन प्रतिकूलं फलमपि जनयति इति एतादृशदानाऽकरणमेव श्रेयः इति ध्वन्यते।

(ख) **गोपालनम्**–उपर्युक्ताः पीतोदकादिविशेषणयुक्ताः गावः अपरेभ्यो न देयाः इति कथनमिदमेतदपि ध्वनयति यत् यदा गवां वार्धक्यम् आयाति ताः दुग्धं न यच्छन्ति, तदा यस्मै कस्मैचित् दानव्याजेन तासाम् उपेक्षा नैव विधेया, अपि तु ताः स्वगृहे पूर्ववत् पालनीयाः रक्षणीयाः च अर्थात् केवलं दुग्धप्राप्त्यैकलक्ष्यैः अस्माभिर्न भवितव्यम्, अपितु गवां विधिवत् पालनमपि विधेयमिति।

(ग) **सस्यम्–सस्यमिव मर्त्यः पच्यते सस्यमिवाजयते पुनः** (कठ.1.1.6) इत्यनेन जीवलोकस्याऽनित्यत्वकथनम् अभीष्टम्। किन्त्वत्र सस्यानां लौकिको व्यवहारोऽपि कथितः। लोको वृद्धः सन् पक्वो मृतो भवति चेत् इतरेऽनुशोचन्ति, किं च शिशौ जायमाने उत्सवो भवति। किन्तु सस्यानां पाकेन, उद्भवेन च लोके हर्षोऽनुभूयते।

(घ) **एषणाः**–लोके त्रिविधा एषणा इच्छा वा परिलक्ष्यते–1. पुत्रैषणा, 2. लोकैषणा, 3. वित्तैषणा। एतासाम् प्रभावो दुरतिक्रम इति प्राचीनैरुक्तमस्ति, तद्यथा–

**'तमात्मानं विदित्वा ब्राह्मणाः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्य्यं चरन्ति। या ह्येव पुत्रैषणा सा वित्तैषणा या वित्तैषणा सा लोकैषणोभे ह्येते एषणे भवतः।'** (शतपथब्राह्मण:14.6.4.1)

'तत्र पुत्रोत्पत्तिमुद्दिश्य दारसंग्रहेच्छा पुत्रैषणा। वित्तं द्विविधम्–मानुषं दैवं च। मानुषं गवादि, तेन पितृलोकजिगीषा। दैवं विद्यादि, तेन देवलोकजिगीषा वित्तैषणा। केवलया हिरण्यगर्भविद्यया दैवेन वित्तेन देवलोकं जेष्यामीति इच्छा लोकैषणा कथ्यते।'

**कठोपनिषदि विविधव्यवहारप्रसङ्गे सर्वविधाः एषणाः परिलक्ष्यन्ते।**

(वाचस्पत्यम् 2.1542)

**1. पुत्रैषणा**–नचिकेताः 'मृत्यवे त्वा दास्यामी' ति पितृवचनमनुपाल्य यमभवनं गच्छति। तत्र तिस्रो रात्रीः उषित्वा यमात् यद् वरत्रयं लभते तेषु प्रथमवररूपेण सः पितृपरितोषमेव कामयते। तद्यथा–

**शान्तसंकल्पः सुमना यथा स्याद्**
**वीतमन्युर्गौतमो माभि मृत्यो।।** (कठ.1.1.10)

अत्रैतेनेदं साक्षात् प्रतीयते यत् वाजश्रवसः पुत्रैषणायाः द्वितीयसोपानवर्ती विद्यत इति यतो हि सः पुत्रमोहकारणेन एव पुत्रस्य यमभवनगतेरनन्तरम् अशान्तचित्तः



दुर्मनाः क्रुद्धोऽजायत। एवमेव अतिथेः असन्तोषात् येषां हानिर्भवति तेषु पुत्रस्याऽपि उल्लेखो विद्यते–

**इष्टापूर्ते पुत्रपशूंश्च सर्वान्।** (कठ 1.1.8)

अतः लोके पुत्रैषणाया महत्त्वमेतेन प्रदर्शितं भवति।

**2. वित्तैषणा**–लोके वित्तस्य प्राप्तौ एषणा इच्छा कथंकारं प्रबला भवति तदपि कठोपनिषदः प्रसङ्गात् सुतरां विज्ञायते। मृत्युः नचिकेतसं प्रलोभयन् ब्रह्मविद्यां प्रति जिज्ञासां परित्यज्य यानि कानिचन भौतिकवस्तूनि स्वीकर्तुं प्रेरयति तेषु वित्तं सर्वादौ विद्यते, तदनु चिरजीविका, विशालभूखण्डे स्वाधिपत्यं च वररूपेण ग्रहीतुं स प्रेरयति–

**एतत्तुल्यं यदि मन्यसे वरं**
**वृणीष्व वित्तं चिरजीविकां च।**
**महाभूमौ नचिकेतस्त्वमेधि**
**कामानां त्वा कामभाजं करोमि।।** (कठ.1.1.24)

वित्तप्रेम्णि निमज्जन्तो मनुष्याः निन्दितां गतिमाप्नुवन्ति इति ब्रुवन् मृत्युः लौकिके जीवने वित्तैषणायाः दुष्प्रभावमेवं विवृणोति–

**नैतां सृङ्कां वित्तमयीमवाप्तो**
**यस्यां मज्जन्ति बहवो मनुष्याः।।** (कठ.1.2.4)

नचिकेता अपि **न वित्तेन तर्पणीयो मनुष्यः** (कठ.1.1.27) इति वचनेन अतर्प्यमाणानाम् अपि मनुष्याणां वित्तमोहत्यागाऽभावं दर्शयति।

**3. लोकैषणा**–न केवलं पुत्रस्य वित्तस्य च मोहेन लोकोऽयं ग्रसितोऽपितु लोकगतपदपदवीप्रतिष्ठप्राप्तेरिच्छाऽपि अत्र प्राबल्येनाऽनुभूयते इत्येतस्मिन् विषये लौकिकीं वृत्तिं सूचयतीयम् उपनिषद्। अतिथेः सपर्याया महत्त्वं दर्शयता यमेन मनुष्यस्य यासाम् अभीष्टीनां सूची कथिता तत्रादौ 'आशाप्रतीक्षे' (कठ.1.1.8) इत्यनयोः उल्लेखः कृतः। तत्र **अनिर्ज्ञातप्राप्येष्टार्थप्रार्थना आशा, निर्ज्ञात-प्राप्यार्थप्रतीक्षणं प्रतीक्षा** इति आदिशङ्कराचार्यो ब्रूते। लोके सर्वेषां पदादिप्रतिष्ठप्राप्ति-

प्रसङ्गे आशा प्रतीक्षा वा सुतारां लक्ष्यत एव। वित्तवतां पुत्रवतां च वित्तैः पुत्रैर्वा तुष्टिरस्तीति न, तैरपि लौकिकी प्रतिष्ठा काम्यते। येषां न वित्तबाहुल्यं न च पुत्रसम्पत्तिः तेऽपि लौकिकप्रतिष्ठयाः प्राप्तौ सर्वविधं यत्नं कुर्वाणाः दृश्यन्ते, इति लोकैषणायाः लोके सूक्ष्मा गतिः पारोक्ष्येणाऽत्र समुल्लिखिता।

**निष्कर्षः**—मुख्यतः ब्रह्मविद्यामेव यमनचिकेतोगतसंवादमुखेन प्रतिष्ठापयितु-कामायामस्यां कठोपनिषदि उपर्युक्तेषु विविधेषु प्रसङ्गेषु लोकगता सामान्या सर्वकालगता प्रवृत्तिरुल्लिखिता विद्यते। महति काले गतेऽपि भौतिकदृष्ट्या संसारे विशिष्टे परिवर्तने आगतेऽपि ताः प्रवृत्तयो यथावदद्यापि प्रवर्तन्ते, जनान् ताः भावयन्ति नियमयन्ति विद्वदविद्वन्निर्विशेषेण सर्वान् मोहयन्ति चेति अहो सूक्ष्मेक्षिका औपनिषदानाम् ऋषीणामिति साश्चर्यं वक्तुं प्रभवामः।

❖



# स्वराश्रया यात्रा

रंजना कुमारी

**वन्दे शैलसुतासुतं गणपतिं सिद्धिप्रदं कामदं**[1] मिति उच्चरन्तं गजाननं मनसा प्रणमन्तं दूरदेशगमनार्थं पादमुद्वहन्तं प्रस्थितं यात्रिणं निरुद्ध्य विहसता एकेन स्वरज्ञेन कथितं—दीर्घनासिकः देवस्तु स्मृतः किन्तु स्वकीया नासिका न परीक्षिता। यात्राकाले स्वकीया नासिका एव कल्याणकर्याः यात्रायाः मार्गं प्रशस्तीकरोति। जानातु नासिकाविज्ञानं यत् शिवस्वरोदये, नरपतिजयचर्यानाम्नि ग्रन्थे पुराणे च पुष्कलं वर्णितमस्ति। यथा यात्रां विना जीवननिर्वाहं सुदुष्करं तथैव वायुं विना कुत्र जीवनम्?

**यावद्वायुः स्थितो देहे तावज्जीवनमुच्यते।**[2] उदरपूर्त्यर्थं मनोभिलषितप्राप्त्यर्थं लक्ष्यसिद्ध्यर्थं वा जनः गृहान्निस्सरत्येव। किन्तु, सिद्धिप्रदं कामदं प्रस्थानं तु कस्यचित् स्वरज्ञस्यैव भवति।[3] शरीरस्थः वायुः नासिकारन्ध्राभ्यां निःसरति। अयमेव वायुः वक्ति यात्रायाः फलाफलम्। पवनमिममाधारीकृत्य संयतात्मनः कन्दमूलफलाशिनः ऋषयः त्रैलोक्यं पश्यन्ति,[4] भविष्यस्य साक्षात्कारं कुर्वन्ति, फलाफलं निर्दिशन्ति। स्वरशास्त्रस्य माहात्म्यं श्रावयता स्वयं शंकरेण कथितम्—

**स्वरज्ञानात्परं गुह्यं स्वरज्ञानात्परं धनम्।**
**स्वरज्ञानात्परं ज्ञानं न वा दृष्टं न वा श्रुतम्।।**[5]

अतएव, नासारन्ध्रे प्रवहमाणं पवनं परीक्ष्य तदनुकूलं प्रथमः पादप्रक्षेपः कर्त्तव्यः इति यात्रायाः आद्या पद्धतिः।

**वामे च दक्षिणे वापि यत्र संक्रमते शिवः।**
**कृत्वा तत्पादमादौ च यात्रा भवति सिद्धिदा।।**[6]

लोकेऽपि प्रचलितमस्ति—जो स्वर चलै तासु पग दीजै कालहु से एक टक्कर लीजै।[7]

द्वासप्ततिसहस्राणां नाडीनां मध्ये नाडीत्रयम् इडा पिङ्गला सुषुम्णेति नाम्ना प्रसिद्धम्। इमां नाडीमाधारीकृत्य प्रवहन् शरीरस्थः वायुः द्वये नासापुटके त्रिधा परिस्फुटति। वाम-

भागे इडा नाडी वर्तते। अतः, वामभागस्थः स्वरः चन्द्रस्वरः कथ्यते। दक्षिणे भागे पिङ्गला नाडी प्रतिष्ठिता। पिङ्गला सूर्यस्य प्रतिनिधिः। पिङ्गलायां प्रवहमाणः सूर्यस्वरः कथ्यते। यदा उभयोः रन्ध्रयोः वायुः सममेव सञ्चलति तदा शिवस्वरः कथ्यते।[8] सुषुम्णावाही वायुरयमग्नेः प्रतिनिधिः भवति। **भोक्त्री सुषुम्ना कालस्य गुह्यमेतदुदाहृतम्।**[9] अतएव अस्मिन् शिवस्वरे यात्रा प्रतिषिद्धा। श्लोको वर्तते–

**क्षणं वामे क्षणं दक्षे यदा वहति मारुतः।**
**सुषुम्ना सा च विज्ञेया सर्वकार्यहरा स्मृता।।**[10]

"यात्रा हानिकारी तस्य मृत्युः क्लेशो न संशयः।"[11] संध्याकाले स्वरपरिवर्तनकाले च स्वरोऽयं प्रवहति। अतः अस्मिन् स्वरे प्रवहमाणे करणीयं कार्यं निर्दिष्टम्–

**ईश्वरे चिन्तिते कार्यं योगाभ्यासादि कर्म च।**
**अन्यत्तत्र न कर्त्तव्यं जयलाभसुखैषिभिः।**[12]

'चदि आह्लादने' धातोः व्युत्पादितः चन्द्रः आह्लादकः शीतलः सौम्यश्च भवति। चन्द्रे प्रवहमाणे शरीरं शीतलं तिष्ठति। प्रवृत्तिः शीतला भवति। मनसः प्रसन्नता प्रकृत्या समुदेति। स्वतः अन्यैः कृतमपराधमपि यात्री न गणपति। स्वरशास्त्रमपि स्वरयति–"चन्द्रचारे विषहते।" शरीरे सहनशक्तेः प्राबल्यं भवति। अतएव स्वरज्ञः निर्दिशति-"दूराध्वगमने चन्द्रः", **दूराध्वाने शुभश्चन्द्रः निर्विघ्नोऽभीष्टसिद्धिदः। दूरदेशे विधातव्यं गमनं तु हिमद्युतौ।"**[13] लोकेऽपि श्रूयते आभाणकमिदम्–सोमे शुक्रे बुधे वाम। एहिविधि लंका जीतल राम।"[14] स्वपत्न्यपहारकं रावणं हन्तुकामः रामः चन्द्रस्वरे लङ्कायाः यात्रां कृतवानिति लोकप्रचलितम्। गृहान्निष्क्रमणं स्वल्पकालिकमपि चन्द्रस्वरे शुभं प्रोक्तम्–निर्गमे शुभा वामा।"

दानं दातुं, विवाहं कर्तुं वस्त्रभूषणादिकं धारयितुं, कृषिकर्म्मणे, बीजवपनाय, शत्रुणा सह सन्धिकरणाय, सेवाकार्याय, चिरस्थायिकर्मसम्पादनाय कृता यात्रा चन्द्रस्वरे शुभा, सिद्धिदा, कामदा श्रेयस्करी च भवति। शिवस्वरोदयः श्लोकयति–**स्थिरकर्मण्यलंकारे दूराध्वगमने तथा। आश्रमे धर्मप्रासादे वस्तूनां संग्रहेऽपि च।। वापी कूपतडागादेः प्रतिष्ठा स्तम्भवेदवयोः। यात्रा दाने विवाहे च वस्त्रालंकारभूषणे।। गृहप्रवेशे सेवायां कृषौ च बीजवापने। शुभकर्मणि सन्धौ च निर्गमे च शुभः शशी।**[15]

यात्राविधिं स्पष्टीकुर्वता कथितम्–'चन्द्रे समपदः कार्यः।'[16] द्वौ वा चतुरो वा वामपादोत्थानं कृत्वा यात्रा कर्त्तव्या। शुक्लपक्षे गुरुवासरे, शुक्रदिने बुधवासरे, सोमदिने च चन्द्रस्वरः अतिचमत्कारकः भवति।



**गुरुशुक्रबुधेन्दूनां वासरे वामनाडिका।**
**सिद्धिदा सर्वकार्येषु शुक्लपक्षे विशेषतः।।**[17]

चन्द्रस्वरप्रवाहे पूर्वोत्तरयोः यात्रा निषिद्धास्ति। स्पष्टमुक्तमस्ति–"वामाचारप्रवाहे तु न गच्छेत् पूर्व उत्तरे।" यदि कोऽपि साहसिकः नियमोल्लघनं करोति तस्य फलमपि निर्दिशति स्वरशास्त्रम्–"**परिपन्थिभयं तस्य गतोऽसौ न निवर्तते। तत्र तस्मान्न गन्तव्यं बुधैः सर्वहितैषिभिः। तदा तु तत्र संयाते मृत्युरेव न संशयः।**"[18] अतः चन्द्रस्वरे पश्चिमायां दक्षिणायां च दिशि एव प्रशस्ता यात्रा।

दक्षिणे नासारन्ध्रे पिङ्गला नाडी प्रतिष्ठिता। पिङ्गला सूर्यस्य प्रतिनिधिः। सूर्यस्तु प्रचण्डं तापं प्रददाति। स्वतः, सूर्य स्वरे प्रवृत्तिः उष्णा क्रूरा च भवति। अतएव, क्रूरकर्म्मणेऽस्मिन् स्वरे कृता यात्रा सिद्धिदा भवति।

**कठिनक्रूरविद्यानां पठने पाठने तथा। स्त्रीसङ्गवेश्यागमने महानौकाधिरोहणे।।**
**भ्रष्टकार्ये सुरापाने वीरमन्त्राद्युपासने। विह्वलोद्धंसदेशादौ विषदाने च वैरिणाम्।।**
**मारणे मोहने स्तम्भे विद्वेषोच्चाटने वशे। प्रेरणे कर्षणे क्षोभे दाने च क्रयविक्रये।।**
**प्रेताकर्षणविद्वेषशत्रुनिग्रहणेऽपि च। खड्गहस्ते वैरियुद्धे भोगे वा राजदर्शने।।**
**भोज्ये स्नाने व्यवहारे दीप्तकार्ये रविः शुभः। क्रूराणि सर्वकर्माणि चराणि विविधानि च।।**
**तानि सिद्ध्यन्ति सूर्येण नात्र कार्या विचारणा।**[19]

एकवारं त्रिवारं वा सूर्यस्वरे विषमं पादोत्थानं भवति।

कृष्णपक्षेऽयं स्वरः अतिचमत्कारकः भवति। शनिवासरे, रविवासरे, मङ्गलवासरे कृष्णपक्षे सूर्यस्वरः अपेक्षिताधिकं फलं प्रापयति।[20] सूर्यस्वरे प्रवहमाणे दक्षिणपश्चिमयोः दिशोः यात्रा निषिद्धा। "**दक्षनाड्याः प्रसारे तु न गच्छेद्याम्यपश्चिमे।**"

स्वराश्रया यात्रा एव देवस्य देवत्वम्। कृष्णस्य ब्रह्मवैवर्ते वर्णिता मथुरा यात्रा कथयति–**चिक्षेप दक्षिणं पादं सुन्दरं स्वात्मविग्रहम्। विधृत्य नासिका वामभागं मध्यमया विभुः।। विसृज्य वायुमिष्टञ्च नासादक्षिणारन्ध्रतः। ततो ययौ नन्दनन्दो नन्दस्य प्राङ्गणं वरम्।।**[21]

इत्थं स्वरशास्त्रमिदं निर्दिशति कतिपयं यात्रोपयोगि तथ्यम्। नासारन्ध्रे प्रवहमाणं वायुमाधारीकृत्य फलाफलनिर्देशने रतं पार्वत्या सह शंकरस्य वार्ताक्रमेण कथोपकथनशैल्या पुष्पितं शास्त्रमिदं नापेक्षते ज्योतिष-शास्त्रस्य सिद्धिप्रदं वारतिथिनक्षत्रयोगकरणानां विवेचनम्।

**न तिथिर्न क्षत्रं न वारो ग्रहदेवता। न च विष्टिर्व्यतीपातो वैधृत्याद्यास्तथैव च।**
**कुयोगो नास्त्यतो देवि भविता वा कदाचन। प्राप्ते स्वरबले शुद्धे सर्वमेव शुभं फलम्।।**[22]

❖

## सन्दर्भाः

1. शब्दकल्पद्रुमः–2, पृष्ठम् 295

2. हठयोगः - द्वितीयोपदेशः, श्लोकः 3

3. मनुस्मृतिः, 11.236

4. ऋषयः संयतात्मानः फलमूलानिलाशनाः। तपसैव प्रपश्यन्ति त्रैलोक्यं सचराचरम्।

5. शिवस्वरोदयः, श्लोकः 21

6. श्लोकः 87

7. सामान्य जीवन आ स्वरोदय विज्ञान–मैथिली अकादमी पत्रिका, अप्रैल-मई 88, पृष्ठ 75

8. हठयोगः 1.41, **इडायां तु स्थितश्चन्द्रः पिङ्गलायां च भास्करः।**
**सुषुम्ना शम्भुरूपेण शम्भुर्हंसस्वरूपतः।।** शि.स्व.50

9. हठयोगः 4.17

10. शिवस्वरोदयः, पृष्ठः 30, श्लोकः 124

11. तथा, श्लोकः 133

12. तथा, श्लोकः 130

13. तथा, श्लोकः 98

14. मै. अ. प., पृष्ठः 75

15. शिवस्वरोदयः 102, 03, 05

16. चन्द्रः समपदः कार्यः रविस्तु विषमः सदा। पूर्णपादं पुरस्कृत्य यात्रा भवति सिद्धिदा। शि. स्व. श्लोकः 88

17. तथा, श्लोकः 69

18. तथा, श्लोकः 76-77

19. तथा, पिङ्गलाप्रभावनिरूपणम्, पृष्ठम् 27, श्लोकाः 14,15,20,21,23

20. **अर्काङ्गारकसौरीणां वासरे दक्षनाडिका।**
**स्मर्तव्या चरकार्येषु कृष्णपक्षे विशेषतः।** तथा श्लोकः 70

21. ब्रह्मवैवर्तपुराणम्, श्रीकृष्णजन्मखण्डः, अध्यायः 71

22. शिवस्वरोदयः, श्लोकः 29-30

❖



# शाकुन्तले स्त्रीधर्मविवेकः

**डॉ. प्रतिमा परमार**

स्त्रीणां धर्म आचरणविधिर्वा स्त्रीधर्मः। तथा च स्त्रीविषयकः तदितरजनसम्बद्धो धर्मो व्यवहारो वा स्त्रीधर्मपदवाच्यो भवितुमर्हति। अभिज्ञानशाकुन्तले एष उभयविधो धर्मोऽत्र समीक्ष्यते।

लोके यथा स्त्रियाः अनेकरूपाणि सन्ति तथा लोकानुकृतेः कारणेन महाकविकालिदासविरचिते अभिज्ञानशाकुन्तलाख्ये नाट्ये स्त्रियाः सर्वविधा दशा उपन्यस्ताः सन्ति। तद्यथा–कन्या, भगिनी, सखी, मातेत्यादीनि मुख्यानि रूपाणि, तथा च तपस्विनी, अप्सराः राज्ञीत्यादीनि गौणरूपाणि। नाट्यान्तर्गतेषु विविधेषु प्रसङ्गेषु तासाम् उपन्यासो लोकजीवने तासाम् आचरणस्य प्रातिनिध्यं वहति।

### 1. कन्या

मेनकागर्भजा विश्वामित्रसुता शकुन्तला नाटकेऽस्मिन् महर्षिकण्वस्य पालिता कन्या विद्यते। कण्वाश्रमे सा वैखानसं ब्रह्मचर्यव्रतं पालयन्ती अस्ति। किन्तु तदीयमिदं व्रतं गृहस्थाख्ये द्वितीयाश्रमे प्रविष्टिं यावदिति स्पष्टम् अभिहितं विद्यते।

प्रियंवदा– **आर्य! धर्माचरणेऽपि परवशोऽयं जनः।**
**गुरोः पुनरस्या अनुरूपवरप्रदाने संकल्पः।।**

(अ.शा.1.24)

अत्र पित्रालये धर्माचरणविधौ कन्यायाः पितृपरवशता सूच्यते, अर्थात् स्वेच्छया काऽपि कन्या आजीवनं ब्रह्मचर्यव्रतम् आचरितुं नैव प्रभवेत्, किन्तु अनुरूपवराय तस्याः प्रदानं यावत् सा अवश्यमेव प्रथमाश्रमगतं व्रतमाचरेदिति संकेतोऽत्र लभ्यते।

किं चेयं कन्या परकीयोऽर्थ इव पित्रालये न्यासवत्तिष्ठति, पिता तस्याः पालनं न्यासरक्षणविधिना कुशलतया करोति, एतेन गृहस्थाश्रमप्रवेशकाले स स्वयमेव

कन्यायाः चारित्रिकशुद्धिविषये विश्वासभूमिः भवति, अतः कन्यापितुः सकाशात् कन्यायाः पाणिग्रहणे वरस्य न काचित् विप्रतिपत्तिरापद्यते इतीयं भारतीया संस्कृतिरत्र परिस्फुटिता विद्यते, तद्यथा-

**अर्थो हि कन्या परकीय एव** (अ.शा.4.22)

अत्र निश्चयार्थक एवकारः पितुः कन्याविषये स्वकीयत्वं निराकरोति, अतः अपरस्य गृहं गत्वा यथा सा कन्या जीवनं वाहयेत् तत्कुलं च संवर्धनपुरस्सरं रक्षेत् तादृशी प्रशिक्षणदृष्टिः प्रथमाश्रमेऽस्मिन् आधारभूता भवति। स्वत्वबुद्ध्या तु एतादृशं प्रशिक्षणम् अवश्यमेव हीयेत।

**2. कन्याविषयिणी आकाङ्क्षा**

लोके ऊढायाः कन्याया विषये पित्रोः पित्रालयसम्बद्धजनानां च याः काश्चन आकाङ्क्षा भवन्ति तासां त्रैविध्यम् अस्मिन् नाटके परिलक्ष्यते। शकुन्तलायाः पतिगृहगमनवेलायां तस्यै आशीर्वादं ददत्यः प्रौढाः तिस्रः तपस्विन्यः क्रमश एवं वदन्ति-

1. **जाते! भर्तुः बहुमानसूचकं देवीशब्दं लभस्व।**
2. **(क) वत्से! वीरप्रसविनी भव।**
   **(ख) सुतं त्वमपि सम्राजं सेव पुरुमवाप्नुहि।** (अ.शा.4.7)
3. **वत्से! भर्तुर्बहुमता भव।** (अ.शा.4.4)

अत्र प्रथमप्रसङ्गे श्वशुरालये पत्युः स्नेहो बहुमानश्च इष्येते, द्वितीये कन्या पत्युः बहुमता भूत्वा जायात्वं गच्छेत् किं च यथाकालं पुरोरिव अनुपमस्य वीरपुत्रस्य माता भवेदिति स्त्रीबन्धवो वाञ्छन्ति, तृतीये च इतरासु सपत्नीषु सतीषु कन्या 'देवी'ति विशिष्टं स्थानं लभेतेति अभीप्सा विद्यते।

**3. गृहिण्या धर्मः**

कण्वस्योपदेशे कस्याश्चिद् गृहस्थायाः ऊढायाः कृते कर्तव्यकर्माणि उद्दिष्टानि सन्ति, तानि चेत्थं द्रष्टुं शक्यन्ते-

1. गुरुशुश्रूषा, 2. सपत्नीजने प्रियसखीवृत्तिः, 3. भर्तुः आनुकूल्यम्, 4. परिजने दाक्षिण्यम्, 5. भोगेषु अनुत्सेकः। एतैः धर्मैः काचिद् युवतिः श्लाघ्यं



गृहिणीपदम् अधिगन्तुं शक्नोति इति वदति महर्षिः कण्वः-

**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः।।** (अ.शा.4.8)

एतेनोपदेशव्याजेन नवोढायाः कस्याश्चित् पतिगृहे प्रतिष्ठाप्राप्तये व्यक्तिभेदेन कथं व्यवहारभेदमाचर्य्य विशिष्टा विशिष्टा वृत्तिः स्यात् तद् विविच्यते। व्यक्तित्व-विकासप्रसङ्गे यथास्थानं यथाजनं यथाकालं च आचरणीयमिति यदुच्यते तदत्र युवतीनां श्वशुरालये नूतनायां परिस्थितौ आचरणवैशिष्ट्यं तेन च आत्मप्रतिष्ठापनं निर्दिशति कविः।

पतिरत्र सहधर्मचारीत्युक्तो विद्यते। पत्न्याः कृते स विश्वासभूमिर्भवति। अतः कदाचिद् अज्ञातकारणेन पत्युः व्यवहारे कस्मिंश्चित् वैपरीत्ये दृष्टेऽपि धैर्यं धारणीयम् इति एतद् वदति मारीचर्षिः शकुन्तलां प्रति-

**वत्से! विदितार्थासि। तदिदानीं सहधर्मचारिणं प्रति न त्वया मन्युः कार्यः।** (अ.शा.7.32)

**4. कन्यायाः अपेक्षा**

पित्रालयं विहाय श्वशुरालयं प्रविष्टा कन्याऽपि पित्रालयतः किञ्चिद् अपेक्षते। सा सर्वदा पित्रालयस्य तद्गतप्रत्येकविषयस्य कुशलतामिच्छति। शकुन्तलाया वचनेनेदं स्पष्टं प्रतिभाति-

**तात! एषा उटजपर्यन्तचारिणी गर्भमन्थरा मृगवधूः यदा अनघप्रसवा भवति तदा मह्यं कमपि प्रियनिवेदपितृकं विसर्जयिष्यथ।।** (अ.शा.4.14)

**5. मातृस्वरूपम्**

गृहस्थाश्रमे पत्या अपत्येन च सह वर्तमानायाः स्त्रियाः स्वरूपं समुपस्थापयन् इव कविः दुष्यन्तेन सर्वदमनेन च सह शकुन्तलायाश्चित्रमेवंप्रकारेण प्रस्तौति-

**दिष्ट्या शकुन्तला साध्वी सदपत्यमिदं भवान्।**
**श्रद्धा वित्तं विधिश्चेति त्रितयं तत् समागतम्।।** (अ.शा.4.29)

विधिना युक्ता श्रद्धाऽवश्यमेव वित्तम् ऐश्वर्यं वा जनयतीत्यत्र भावः। तत्रापि इदानीं मातृत्वमारूढा शकुन्तला श्रद्धास्वरूपिणी वर्तत इति कथनेन मातृरूपं प्रति मर्यादाबोधः स्फुटं प्रतिभाति।

आश्रमवासिना कथमिदं लोकव्यवहारज्ञानं सुकरमिति सम्भावितां शङ्कां परिहर्तुं कविः काश्यपर्षिमुखेन लौकिकज्ञानस्य महत्त्वम् प्रकटयति–

काश्यपः–**वनौकसोऽपि सन्तो लौकिकज्ञा वयम्।** (अ.शा.4.17)

पारलौकिकज्ञानवैभववतां लौकिकज्ञानं शुद्धं परिष्कृतम् औचित्यपूर्णं च भवतीति महाकविः प्रतिपदं दर्शयति।

एवप्रकारेण स्त्रीणां विविधावस्थायाम् आचारान् विविधप्रसङ्गव्याजेन उपन्यस्य महाकविः आदर्शभूतायाः स्त्रिया मानकं स्वरूपं प्रस्तौति।

❖



## फार्म - ४

**नियमः ८ द्रष्टव्यः**

| | | | |
|---|---|---|---|
| 1. | प्रकाशनस्थानम् | : | आरा (विहारः) |
| 2. | प्रकाशनस्य अवधिः | : | अर्धवार्षिकम् |
| 3. | मुद्रकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, आरा |
| 4. | प्रकाशकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 5. | सम्पादकस्य नाम | : | प्रो. गोपबन्धु मिश्रः |
| | किमसौ भारतस्य नागरिकः? | : | एवम् |
| | सङ्केतः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |
| 6. | तेषां जनानां नामानि सङ्केताश्च ये समाचारपत्रस्य स्वामिनः स्युः तथा च ये समस्तव्ययस्य एकप्रतिशतात् अधिकस्य अंशग्राहकाः स्युः | : | संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम् प्रकाशपुरी, आरा (विहारः) |

अहं गोपबन्धु मिश्रः एतद्द्वारा उद्घोषयामि यत् मम-अधिकतमस्य बोधस्य विश्वासस्य च अनुसारेण उपरि प्रदत्तं विवरणं सत्यम् अस्ति।

**ह. गोपबन्धु मिश्रः**
सम्पादकः